# PREMA VIJAYAM

BY
**T. S. SUNDARESA SARMA**

PUBLISHED BY
**THE GENERAL STORES**
**TANJORE**

PRINTED AT THE
SRI VIDYA POWER PRESS
KUMBAKONAM





1943 [Price Re. 1

श्रीमहीशूरपुर परकालमठ महादेशिकेन्द्राणाम् :—

"कविवरेणामुना कवितायां सुवर्णतन्तौ प्रोतानां मणीनामिव सुखेन निगुंफितानां मिथो मैत्री लालिनी सौरभी च धिनोति सचेतसां चेतांसि । कविरसौ श्रीमद्भगवद्रघूत्तंस गुणकथाभिर्वर्णनेन नितरां सफलयति निजां रमणीयां वाणीम् । किञ्चैष साक्षात्कृतरघुवरस्य परमभागवतस्य श्रीत्याग-राजस्य पावनतमं चरितं कृत्स्नं समगृह्णात्पञ्चदशभिः सर्गैः । एष कविरुद्वेलयति भगवति भागवते च भक्तिम् । कलिकलुषेऽत्र-काले नैतादृशाः कवयो दृक्पथमधिरोहन्ति" ॥

# FOREWORD

BY

DR. V. RAGHAVAN, M.A., Ph. D.,
University of Madras.

I gladly agree to write a few lines of introduction to this latest work of Sri Sundaresa Sarma, with whom I am acquainted ever since he published his first Sanskrit composition, The Tyagaraja Charitam, in 1937. I need hardly congratulate him on his continuing his poetic activity; for, Expression is of the same category as what has been well characterised as blind, and its self-established (*Svatassiddha*) life is essentially independent of extraneous circumstances like the presence or absence of patronage. The preacher cannot be lecturing to benches, but the lark may yet be singing in its solitude.

Like Hinduism, the Sanskrit language stands up as a challenge to time and history; it is not alive merely on paper like the classic languages of Europe; the accents in which, in the dawn of time in this land, the sage-bards uttered forth their Riks are still to be heard, and though we may not be living in Patañjali's time when a charioteer could floor a grammarian in the latter's own lore, there is still amidst us a community of people which continues to converse and even compose poetry in this *Amara Bhāshā*, the deathless language.

At Tanjore where once Princes poured patronage on poets, Sri Sundaresa Sarma sought business for his material help and continues to keep alive his spiritual yearing for expression in Sanskrit. Sri Sarma's devotion

श्रीमहीशूरपुर परकालमठ महादेशिकेन्द्राणाम् :—

"कविवरेणामुना कवितायां सुवर्णतन्तौ प्रोतानां मणीनामिव सुखेन निगुंफितानां मिथो मैत्री लालिनी सौरभी च धिनोति सचेतसां चेतांसि । कविरसौ श्रीमद्भगवद्रघूत्तंस गुणकथाभिवर्णनेन नितरां सफलयति निजां रमणीयां वाणीम् । किञ्चैष साक्षात्कृतरघुवरस्य परमभागवतस्य श्रीत्यागराजस्य पावनतमं चरितं कृत्स्नं समगृह्णात्पञ्चदशभिः सर्गैः । एष कविरुद्वेलयति भगवति भागवते च भक्तिम् । कलिकलुषेऽत्र काले नैतादृशाः कवयो दृक्पथमधिरोहन्ति" ॥

# FOREWORD

BY

DR. V. RAGHAVAN, M.A., Ph. D.,
University of Madras.

I gladly agree to write a few lines of introduction to this latest work of Sri Sundaresa Sarma, with whom I am acquainted ever since he published his first Sanskrit composition, The Tyagaraja Charitam, in 1937. I need hardly congratulate him on his continuing his poetic activity; for, Expression is of the same category as what has been well characterised as blind, and its self-established (*Svatassiddha*) life is essentially independent of extraneous circumstances like the presence or absence of patronage. The preacher cannot be lecturing to benches, but the lark may yet be singing in its solitude.

Like Hinduism, the Sanskrit language stands up as a challenge to time and history; it is not alive merely on paper like the classic languages of Europe; the accents in which, in the dawn of time in this land, the sage-bards uttered forth their Riks are still to be heard, and though we may not be living in Patañjali's time when a charioteer could floor a grammarian in the latter's own lore, there is still amidst us a community of people which continues to converse and even compose poetry in this *Amara Bhāshā*, the deathless language.

At Tanjore where once Princes poured patronage on poets, Sri Sundaresa Sarma sought business for his material help and continues to keep alive his spiritual yearing for expression in Sanskrit. Sri Sarma's devotion

to Sanskrit and its culture has not left him to rest content with a mere daily outturn of verse, but has necessarily made him the moving spirit of manifold cultural activities in his place, such as the Sanskrit Academy which recently put on boards his Sanskrit play, the *Prema Vijayam*, now offered in print in the following pages.

The story of this play, *Prema Vijayam*, is the triumph of the love of the court-poet's son who, like Bilhana, dares to love the Princess, and eventually wins her hand as the prize for deeds of valour displayed in the cause of the King. For a mere reading, the plot, even as the style, may appear simple, but as one who has seen the play enacted, I can say that it gives much scope for dramatic action and does not fail to be effective.

I have much pleasure in recommending this play to the attention of the Sahridayas.

MADRAS,
25—2—43. } V. RAGHAVAN.



Sachivothama
Sir. C. P. Ramaswamy Aiyar,
DEWAN OF TRAVANCORE

Bakthi Vilas
TRIVANDRUM.
18th March 1943.

*Dear Sir,*

I have just finished reading the " Prema Vijayam " published by you. I congratulate you on the manner in which you have described the history of Chandralekha and Hemachandra and on the poetical fecility displayed by you.

C. P. Ramaswamy Aiyar.

**Sir. S. Varadachariar,**
Judge, Federal Court,
**NEW DELHI.**

**10, Albuquerque Road,**
**NEW DELHI.**
**Date—April 4, 1943.**

Much as I appreciate your kindness in asking me for an opinion about the works, I feel bound to say that I am unable to arrogate to myself the role of a critic in the matter. I am glad to own to my interest in the subject and to some endeavour to study it, but that is a different matter. I have however no hesitation in stating how much I am impressed by the grace and felicity of your diction and the remarkable simplicity of your style. Alighting on any page, one finds that any *sloka* found there is not merely pleasantly musical but very easy to understand for one with even an average working knowledge of Sanskrit and it is noteworthy that you have been able to preserve this characteristic in all the variety of your works, whether it is a story or a *stotra*, a *bhana*, or a *nataka*. I wish these books are widely read by people as a corrective to the prevalent impression that it is very difficult to acquire a knowledge of Sanskrit. But one notes with regret that there seems to be little hope of a spread of Sanskrit knowledge or even of interest in it.

**S. Varadachariar.**

Justice N. Chandrasekhara Ayyar, 96, Mount Road, MADRAS.

*Dear Sir,*

"PREMA VIJAYAM", a play written by Mr. Sundaresa Sarma, deserves a word of praise. There is nothing profound or very attractive about the theme of the plot, but the language employed by the author is simple, elegant and chaste. Several *rasas* find suitable expression in the poems found in the book.

31st March 1943.

N. Chandrasekhara Aiyar.

Sir. S. Varadachariar,
Judge, Federal Court,
NEW DELHI.

10, Albuquerque Road,
NEW DELHI.
Date—April 4, 1943.

Much as I appreciate your kindness in asking me for an opinion about the works, I feel bound to say that I am unable to arrogate to myself the role of a critic in the matter. I am glad to own to my interest in the subject and to some endeavour to study it, but that is a different matter. I have however no hesitation in stating how much I am impressed by the grace and felicity of your diction and the remarkable simplicity of your style. Alighting on any page, one finds that any *sloka* found there is not merely pleasantly musical but very easy to understand for one with even an average working knowledge of Sanskrit and it is noteworthy that you have been able to preserve this characteristic in all the variety of your works, whether it is a story or a *stotra*, a *bhana*, or a *nataka*. I wish these books are widely read by people as a corrective to the prevalent impression that it is very difficult to acquire a knowledge of Sanskrit. But one notes with regret that there seems to be little hope of a spread of Sanskrit knowledge or even of interest in it.

S. Varadachariar.

Justice N. Chandrasekhara Ayyar,

36, Mount Road,
MADRAS.

*Dear Sir,*

"PREMA VIJAYAM", a play written by Mr. Sundaresa Sarma, deserves a word of praise. There is nothing profound or very attractive about the theme of the plot, but the language employed by the author is simple, elegant and chaste. Several *rasas* find suitable expression in the poems found in the book.

31st March 1943.

N. Chandrasekhara Aiyar.

## A. S. P. Ayyar, M.A., I.C.S., F.R.S.L.

BAR-AT-LAW,

District & Sessions Judge.

---

"Mr. Sundaresa Sarma has written an interesting play in Sanskrit in this twentieth century, confounding all the wiseacres, who have proclaimed that Sanskrit is a *dead* language. It is not in vain that the high-caste Hindu all over India still recites his *mantras* at ceremonies in Sanskrit, a sure proof, if proof were needed, that it was a spoken language in times of yore. In this play, the verses are graceful, and the prose flowing."

Camp : Vellore,<br>Date : 21-3-43.

A. S. P. Ayyar.

Dewan Bahadur

## K. S. Ramaswami Sastrigal,

District & Sessions Judge, (Retired).

---

I have perused with great pleasure and profit Mr. T. S. Sundaresa Sarma's new Sanskrit drama entitled 'PREMA VIJAYAM'. What a charming title! Prema is the last word in human happiness and forms along with Rasa and Ananda a trio of ultimate and untraslateable words. The author has taken for the plot of his play a new and original creation of his own dealing with the oldest and most lackeyed of all themes viz. human Love. The greatness of a dramatist consists in making ever-new at ever-old theme, and here Mr. Sarma has achieved new victories and won new laurels. As an elder scholar and critic and poet and playwright; I know the difficulties of the task and also the joys of surmounting them.

"There is a pleasure in poetic pains
That only poets know".

Every new work of Mr. Sarma shows an increasing mastery over the complicated technique of Sanskrit poesy and drama and a clearer and more confident comprehension of the supremely beautiful and spiritual ideals of Sanskrit literature. It is my view that new plays and poems must continue to be produced in Sanskrit both to show that it is not a dead language but is a living language destined to live for ever and also to saturate our souls with its highest ideals because no amount of

study can bring about such a result as well as creative endeavour.

Mr. Sarma has handled the theme with a distinctive and original grace of his own. He has avoided the two defects of becoming an echo of the masters of the past and of trying to compete with and surpass them. He has in short tried *to be himself* and *to express himself*—a rare thing indeed though one might regard such an achievement as being easy of accomplishment.

I desire to point out the many excellences of the play but must not allow an opinion to become a book. I must however refer to three aspects only. Mr. Sarma's falicity in describing Nature, his fine handling of the passion of Love, and his subtle *suggestiveness* in expressing the gamut of poetic emotion (Rasa-Dhvoni).

Here are a few examples:

पुष्पोद्गमेन रुचिराऽसि नवांगकांतिः
भोक्तुं क्षणादुपगतभ्रमरालिनूनम् ।
कालेषु योजयति तत्तदभीप्सितानि
पुण्योदयेषु विधिरेव विधानदक्षः ॥

पुलकयति शरीरं स्मर्यमाणं त्विदानीं
मयि करपुटमादावामृशत्यंबुजाभम् ।
यदियमुपगता स्वोत्कंपि गात्रे निदाघं
रसतरलितचेता वल्लरीवाकुलांगी ॥

Mr. Sarma excels also in his ethical apothegms.

मूढास्त्वल्पस्य लाभेन गर्वान्धितविलोचनाः ।
तूष्णीकुर्वन्ति विदुषः पूजनार्हान्महात्मनः ॥

I wish Mr. Sarma a long career of poetic productiveness, because whatever be the depressions due to the repressions of the drab and dismal realities of life especially in modern India there is no joy like unto the joys of artistic creation. One of the supreme aestheticians of India-Mammata-says:

नियतिकृतनियमरहिताह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥

Rightly does Mr. Sarma also tell us:

रसवदपिपुराणं नैव तोषाय पुंसा-
मभिनवविषयेष्वेवाय भूयान् प्रमोदः ।
भृशतरमकरन्दस्यन्दिचूतप्रसूना-
न्नवविकचसरोजं किं न धावन्ति भृङ्गाः ॥

Camp: Chidambaram,
Date: 27—3—43.

**K. S. Ramaswami Sastri.**

S. P. Sarma,
Director-General,
S. L. Society.
MAMBALAM.

As I am not sure whether at the present day a critical analysis of this new drama and its characters would interest the readers I disist from it. The author is a very learned Sanskrit Scholar and depicts the characters very much splendidly in a lucid style. He interweaves new details and modifies old ones. In every act he shows his insight into the working of the human mind. The portray of the inner feelings i. e. of चन्द्रलेखा and others is interesting. Public must be very much thankful for this Sanskrit poet. He deserves all encouragement.

S. Putarjuna Sarma.

Sri. P. S. Viswanathan, I.C.S.,

विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।
सुकवेरर्थसौभाग्यं सुकविर्वेत्ति नापरः ॥

क्वमतिस्स्वल्पविद्यस्य क चैषा प्रतिभा कवेः ।
कविप्रार्थित इत्येव करोम्यद्य विमर्शनम् ॥

पठितं बहुमोदेन दृश्यकाव्यमिदं मया ।
अभिनीतं ममाध्यक्ष्ये तुङ्गपुर्यां पुरातुलम् ॥

अपुराणकथामूला कविकौशलकल्पिता ।
नवीनाप्यनवद्येयं रचना साधु शोभते ॥

द्राविडाङ्गलसाहित्यकलासर्वस्वमण्डिता ।
गीर्वाणीयं विभात्यत्र दृश्येत्याह्लाददायिनी ॥

स जयतु विजयः प्रेम्णः स जयतु कर्ता च सुन्दरः सूरिः ।
विलसतु वाणी दैवी वाक्षु सदास्माकमार्यवत्सानाम् ॥

HOSPET, 5—4—43.

P. S. Viswanathan.

S. P. Sarma,
Director-General,
S. L. Society.
MAMBALAM.

As I am not sure whether at the present day a critical analysis of this new drama and its characters would interest the readers I disist from it. The author is a very learned Sanskrit Scholar and depicts the characters very much splendidly in a lucid style. He interweaves new details and modifies old ones. In every act he shows his insight into the working of the human mind. The portray of the inner feelings i. e. of चन्द्रलेखा and others is interesting. Public must be very much thankful for this Sanskrit poet. He deserves all encouragement.

S. Putarjuna Sarma.

Sri. P. S. Viswanathan, I.C.S.,

विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।
सुकवेरर्थसौभाग्यं सुकविर्वेत्ति नापरः ॥

क्वमतिस्स्वल्पविद्यस्य क्व चैषा प्रतिभा कवेः ।
कविप्रार्थित इत्येव करोम्यद्य विमर्शनम् ॥

पठितं बहुमोदेन दृश्यकाव्यमिदं मया ।
अभिनीतं ममाध्यक्ष्ये तुङ्गपुर्यां पुरातुलम् ॥

अपुराणकथामूला कविकौशलकल्पिता ।
नवीनाप्यनवद्येयं रचना साधु शोभते ॥

द्राविडाङ्गलसाहित्यकलासर्वस्वमण्डिता ।
गीर्वाणीयं विभात्यत्र दृश्येत्याह्लाददायिनी ॥

स जयतु विजयः प्रेम्णः स जयतु कर्ता च सुन्दरः सूरिः ।
विलसतु वाणी दैवी वाक्षु सदास्माकमार्यवत्सानाम् ॥

HOSPET, 5—4—43. P. S. Viswanathan.

Sree R. M. Sundaram, I.C.S.,
Collector, Salem.

Many thanks for your book "Prema Vijayam". I wonder how in this time of strife and turmoil, you found repose in verse making and that in Sanskrit. Your love of the language and your mastery in it, coupled with a desire to stimulate and cultivate its acquisition by the public, should have been the main cause for your endeavour & I wish you all success in this noble mission. There is no remedy to present day evils except through a deep study of our ancient Sanskrit scriptures and a preliminary to this will be to read your Prema Vijayam, written in easy style and flowing phrases and acquire a taste for the language and love for one's own Country's Historical past and personages. Viewed in this light, your endeavour is a noble attempt at resuscitating our ancient literature and religion and I only wish that the Educational Authorities may patronise your work and spread it before the reading public in Schools and Colleges. Even otherwise, the Sanskrit world will welcome it and benefit by its broadcast.

SALEM,
17-4-43.

R. M. Sundaram.

Rao Bahadur S. K. YEGNANARAYANA IYER, M. A.,

MADRAS,
30—4—43.

As an humble student of Sanskrit I enjoyed very much the reading of your play, "Prema Vijayam". It gave me immense pleasure to note that Sanskrit is not a dead language as some people think; but times and is being handled successfully as a vehicle of thought.

My hearty congratulations to you on the success you have achieved in this difficult task of composing an original Sanskrit Drama.

You had (of your own deliberate choice) to demise a plot and find words and you have succeeded very well in both. You have an enviable mastery over facile expression and both your verses and prose (as for example the mourning of Chandralekha on page 69) flow on easily.

You seem to be saturated with Kalidasa and many passages from the नान्दी onwards in your book remind us of the Master. To give only one example

भूयः कवीन्दुतनयस्स तु हेमचन्द्रो ।
जन्मान्तरेपि पतिरस्तु न विप्रयोगः ॥

irresistably reminds us of Sita's words (Raghuvamsa XIV—66)

भूयो यथा मे जननान्तरेऽपि ।
त्वमेवभर्ता न तु विप्रयोगः ॥

Having said so much in praise I would be forgiven if I make one comment not quite enlogistic. My

study of English literature has made me partial to the view of drama's function being, "to hold, as 't were the mirror upto nature", judged by this standard your performance does not come up high. You have written a learned Drama which would serve as a good illustration of what a drama ought to be according to the rules. It is a good imitation of our classical dramas ; but it is produced in an artificial atmosphere. It is not rooted in the soil of South India and has nothing to do with the variegated life of our country as it is being lived today.

I echo your wish and hope

भाषां किंच चिरन्तनीं सुमनसः ।
संमानयन्त्वन्वहम् ॥

May God bless you with health and peace of mind so that you may produce many more reginal works like this to the delight of us all.

*Yours Sincerely,*
S. K. YEGNANARAYANA IYER.



पद्माक्षसूत्रकलिताभयचिह्नहस्ते
पीयूषपात्रशुकपोतविराजिपाणे ।
जान्वर्पिताग्रकरकल्पितपुस्तकेऽम्ब
गृह्णीष्व पादकमलार्पितमेतदार्ये ॥



## ॥ नाटकपात्रसूची ॥

---

प्रतापरुद्रः —मगधाधिराजः ।

सर्वदमनः }
सर्वपालः } सचिवौ ।

दुर्मतिः —सेनापतिः ।

अनङ्गदासः—द्वितीयस्सेनापतिः ।

कलाधरः }
कीर्तिकेतुः } सभापण्डितौ ।

हेमचन्द्रः —कलाधर कुमारः ।

वृषसेनः —दुर्मतेर्वयस्यः ।

शतबलिः —अन्तःपुराध्यक्षः ।

शताननः —कलाधरशिष्यः ।

कामन्दकः —शताननमित्रः ।

सस्वर्तकः —काश्मीरचारः ।

---

दयावती —महिषी ।

चन्द्रलेखा —राजकुमारी ।

मदनलतिका }
सरोजिनी } चन्द्रलेखावयस्ये ।

प्रतीहारी —

---

## ॥ कथासङ्ग्रहः ॥

वैदेहयुद्धे निजरक्षकाय कविकुमाराय हेमचन्द्राय, मगधाधिपेन प्रतापरुद्रेण, कृतं रत्नकृपाणपारितोषिकदानं वीक्ष्य असहिष्णुः सेनापतिः दुर्मतिः हेमचन्द्रं क्रीडाविहारव्याजेन निहन्तुकामः तं वृषसेनमुखात् अनाययति विविक्तं उद्यानम् ॥

तत्र पराजिते दुर्मतौ सौधगता राजदारिका चन्द्रलेखा अभिवीक्ष्य हेमचन्द्रं बद्धानुरागा पुनस्तं आनाय्य गृहोद्यानं संलपति ॥

चन्द्रलेखाहेमचन्द्रयोः अनुरागबन्धः दुर्मतिना महाराजकर्णपथमारोपितः इति आकर्ण्य क्लिश्यन् कलाधरः महाराजेन सन्धेः आहूतः प्रयाति कुमारेण ॥

तत्र परिवेषणायायातां चन्द्रलेखां वर्णयति हेमचन्द्रे, अन्यविषयिकं अन्त्यपादमापूर्य कुमारं रक्षति कलाधरः ॥

ततश्च विविक्तोद्यानं आनीतो हेमचन्द्रः मार्गगतं दुर्मतिं कलहे हत्वा चन्द्रलेखामासीदति ॥

दुर्मतिवधामर्षितेन महाराजेन कारागृहे निक्षिप्तो हेमचन्द्रः। अनुनीतः कलाधरेण महाराजः प्रतिमहिपनिरसनाय प्रेषयति हेमचन्द्रम् ॥

काश्मीरचारेण आवेदितहेमचन्द्रनिधनवार्ता चन्द्रलेखा अग्नौ पतितुमुद्युङ्क्ते। जयनिनादेन प्रतिनिवर्तते हेमचन्द्रः। नरपतिश्चन्द्रलेखां हेमचन्द्रेण परिणाय्य परितोषयति ॥

॥ शुभम् ॥

॥ श्रीः ॥

# ॥ प्रेमविजयः ॥



कल्याणाचलकार्मुकोप्यटति यो भिक्षां जगद्भूतये
हीनो रूपगुणैर्धरत्यसदृशीर्यस्त्वष्टमूर्तीः स्वयम् ।
ध्येयो योगिभिरप्यपेतविषयैर्यो वा विधत्ते तपो
निष्कामोऽपि वधूं समुद्वहति यः शंभुः स कुर्याच्छिवम्

[ नान्द्यन्ते ]

सूत्रधारः—अद्य खल्वाज्ञप्तोऽस्मि मुरहरमहोत्सवसंमेलने समागतेन पण्डितमण्डलेन "सुन्देरशशर्मनिर्मितं प्रेमविजयनामकं रूपकमभिनेतव्यं" इति

पारिपार्श्वकः—[ सविमर्शम् ] कथं शताधिकेषु महाकविकृतेषु रूपकेष्वाधुनिकस्य कवेः कृतिष्वादरः सुधीवर्गस्य ?

सूत्रधारः—अभिनवतैव सर्वानावर्जयति । पश्य !

रसवदपि पुराणं नैव तोषाय पुंसा-
मभिनवविषयेष्वेवाद्य भूयान् प्रमोदः ।
भृशतरमकरन्दस्यन्दिचूतप्रसूना-
न्नवविकचसरोजं किं न धावन्ति भृङ्गाः ॥२॥

पारिपार्श्वकः—अथ किम् ।

सूत्रधारः—इदमप्यपरं कारणम् ।

श्रीत्यागराजचरितं रचितं नु पूर्वं
शृङ्गारशेखर इति प्रथितश्च भाणः ।
तद्भावपोषणवचोरचनानुरक्ता-
स्तन्नूत्ननाटकविलोकनकौतुकास्ते ॥३॥

पारि—एष मन्ये कवेरस्य भाग्यपरिपाकः । यतः—

रमन्ते नहि सद्वस्तुष्वसूयाक्रान्तचेतसः ।
हेमचन्द्रयशस्येष सामर्ष इव दुर्मतिः ॥४॥

सूत्र—अहो आगच्छतीव दुर्मतिः । नस्थातव्यमिहास्माभिः । एहि गच्छावः !

पारि—तथा । [निष्क्रान्तौ]

॥ प्रस्तावना ॥

---

## ॥ प्रथमोऽङ्कः ॥

---

दुर्मतिः—ततः प्रविशति दुर्मतिः

पूर्वं मया रिपुचमूरखिला विजित्य
संप्रापिताऽस्य जयसंपदनन्यलभ्या ।
सोऽयं नृपस्तु कविपुत्रकृतादरो यत्
तद्भूभृतां चपलतां प्रकटीकरोति ॥५॥

[सचिन्तानिःश्वासं] कथं वा समूलमुन्मूलयिष्यामि तं दुर्मेधसम् ? पारयिष्यत्ययमेवात्र वृषसेनः ।

ततः प्रविशति वृषसेनः ।

वृषसेनः—[निर्वर्ण्य स्वगतं] कथं विमना इव वयस्यः ?

एवमुपहसामि । [ प्रकाशं ] प्रियसख कथं विह्वलोऽसि मृतमर्कट इव मर्कटोपजीवी ?

दुर्मतिः—[सातङ्कं] अल्पस्य तस्य हेमचन्द्रस्य रत्नकौक्षेयक-पारितोषिकमप्यालक्ष्य किमु प्रहृष्येयम् ?

वृष—कौक्षेयकरक्षणभराद्विनिर्मुक्त इति तोषाय ।

दुर्मतिः—नायमवसरः परिहासस्य । सत्यमेव क्लिश्यते मे मनः ।

वृष—का वा प्रसक्तिस्तस्य स्तुतिजीविनस्तादृशपारितोषिकलाभस्य ?

दुर्मतिः---वैदेहनृपतेर्विजेतेति ।

चूष--किमस्मन्नृपतिना न स पराजितो वैदेहः ? ।

दुर्मतिः—सामन्तराजशाङ्कितेन महाराजेन नगररक्षणे नियुक्तस्य मम न हि दर्शनीयमासीत् तद्युद्धम् । श्रुतं पुनस्तेनैव हेमचन्द्रेण जितमिति सभायां राजगदितम् ।

चूष—अहो तस्यापि वैदेहस्य विजेतेति तस्य मुष्टिगता वसुन्धरा ।

दुर्मतिः—नहि न युक्तं नामैतत् ।

स किल भुवनपालः शैलवत् दुष्प्रधर्षः
प्रकृतिषु कृतसम्यक्छासनाद्रूढमूलः ।
अविरतबहुशिक्षादक्षसेनानुयातो
न रिपुकुलसमूलोन्मूलनात्सन्निवृत्तः ॥६॥

चूष—वर्धते महाराजो वीरजनसमाश्रयेण ।

दुर्मतिः—नायमवसरः प्रमोदस्य ।

यदि विस्रम्भमभ्येति हेमचन्द्रेऽद्य भूपतिः ।
सेनापतिः सैव भवेत् ततः स्यामेष निष्पदः ॥७॥

तच्चिन्तय तावत् कथं वा संवर्धमानमिममाश्रयाशं निर्वापयिष्ये ?

चूष—[क्षणं विचिन्त्य] कथमिदमस्माकमसुकरं नाम ?

दुर्मतिः—[सकुतुकं] कथमिव ?

वृष—एवं [इति कर्णे कथयति] ।

दुर्मतिः—[सश्लाघं] पण्डितोऽसि परवंचने । प्रेषय त्वरितमवरोधपार्श्वगतं निष्कुटं, यावदहमपि कृपाणपाणिरासादयामि ।

वृष—तथा । [इति निष्क्रान्तौ ।]

॥ विष्कम्भः ॥

---

ततः प्रविशति हेमचन्द्रः ।

हेमचन्द्रः—[परिक्रामन्] अत्रैव किल सन्निधातुमवनिपतिना वृषसेनमुखेन समाहूतोऽस्मि । अहो वीरजनपक्षपातिता राज्ञः । यन्मामपि समानावस्थमिव सवयस्कं मत्वाऽत्र विजनोपवन आत्मसंवर्धितायाः कृतामन्दप्रेमभरायाः विकसितनवपल्लवाभिरामाया नवकुसुमसमुद्गमाया मल्लीवल्ल्या अवलोकनकौतुके भागभाजं करोति महाराजः [साशंकं] कुतो विलंब्यते ? मृगये तावन्नवप्रसूनलक्ष्मीं तां मल्लीवल्लीम् । [परितोऽवलोक्य] अहो रमणीयेयमवनिपतेरारामभूमिः [सकुतुकम्]

स्नातेव प्रतिभाति शीतलजलासिक्तालवाला पुनः
सम्यक्कृत्तनवाग्रपल्लवगणा भातीव सीमन्तिनी ।
चित्रैः पुष्पभरैः प्रसाधितवतीवाभूषणानां गणैः
एषा हृद्यतमा विराजति परं कान्तेव कान्तार्थिनी ॥८॥

[परिक्रामन्] अये आह्लादकारिता अवरोधोद्यानपवनस्य ।

आमोदहारी नवचम्पकानां
आलोलपुष्पन्धयवर्जितानाम् ।
आतिथ्यहेतोरभिमानपात्र-
मागच्छतीवाशुगमित्ररत्नम् ॥९॥

किमियं मालती दृष्टमात्रेण कंपयन्ती कुसुमभारावनत-मुत्तमाङ्गं पल्लवाङ्गुलीभिर्मां समाह्वयति । संभावयामि तावत् । अयि मालति,

पुष्पोद्गमेन रुचिराऽसि नवाङ्गकान्तिः
भोक्तुं क्षणादुपगतभ्रमरासि नूनम् ।
कालेषु योजयति तत्तदभीप्सितानि
पुण्योदयेषु विधिरेव विधानदक्षः ॥१०॥

[परितः पश्यन्] एष अवरोधगृहविच्छन्दक आकर्षतीव मनः।
आलंबिकार्तस्वरपञ्जरान्तर्विहारिकीरप्रमदारवेण ।
आकारयत्यात्मविभूषणाय कलावतीं कामपि सौधकोऽयम् ॥
[ इति पश्यन्नेव तिष्ठति । ]

दुर्मतिः—[प्रविश्य स्वगतं] दुर्मतिकर्दमे लग्नोऽयं मत्तकलभः कथं वा निष्क्रमिष्यति ? [प्रकाशं] सखे कथमेकान्तमिदमुद्यान-मागतोऽसि ? [सविमर्शं] कच्चिद्भवानप्याहूतो महाराजेन कुसुमितायाा नवमल्लिकायाः प्रत्यक्षीकरणाय ।

हेम—अथ किम् ।

दुर्मतिः—त्वयि किल महाराजस्य महान् प्रेमातिशयः ।

हेम—भागधेयमिदं मे । अन्यथा कथमस्य रत्नकृपाणस्य लाभ-संभवः ?

[करवालमाकर्षन् ।]

पश्य रत्नान्यनर्घाणि कुसुमानीव निष्कुटे ।
आवर्जयन्ति नेत्राणि मनांस्यपि मनीषिणाम् ॥१२॥

दुर्मतिः—[सासूयं पश्यन् ।]

नूनं प्रसाधनायैव निस्त्रिंशो रत्नभूषितः ।
न हि पिञ्छगतं नेत्रं वीक्षणाय शिखण्डिनः ॥१३॥

हेम—अन्तःपुरवधूजन इव कथमहमप्याभरणेन परितोष्येय महाराजेन ?

जह्यामिमं च निस्त्रिंशं नचेद्युद्धाय मेऽस्ति सः ।
प्रयोजनविहीनं द्राक् निर्मोकमिव पन्नगः ॥१४॥

दुर्मतिः—उचितमिदम् । कथं परीक्षितासे कल्पतेऽयं नवेति ?

किन्तु रिपुभिरुपात्ते घोरघोरे यतेथाः
रणशिरसि कृपाणस्यावगन्तुं दृढत्वम् ।
उडुपशिथिलतां वा द्रष्टुमम्भोधिमध्ये
गत इव भृशदुर्गे पञ्चतामेष्यसि त्वम् ॥१५॥

हेम—[स्वगतं] कथमदृष्टपूर्वो दुर्विनयोऽस्य ? [प्रकाशं] जानातु भवानिमं परिज्ञातनिखिलप्रहरणसारम् ।

दुर्मतिः—प्रियसख! किमकाण्डे कुप्यसि सौहार्दसंचोदितवचने मयि?

हेम—तर्हि क्षम्यताम्। कोवाऽस्य बलपरीक्षायामुपायः?

दुर्मतिः—[परितोऽवलोक्य स्वगतं] न कोप्यत्र सौधपालिकायाम्। हन्त। शफरो जाललग्नः। [प्रकाशं] यद्युचितं मन्यसे लीलासांपरायिकमेवावयोः।

हेमचन्द्रः—वयस्य साधु मन्त्रितम्। विविक्तोऽयं निष्कुट इत्युचितमिदं स्थानं लीलासांपरायिकस्य।

[ ततः प्रविशति सौधगता ससखी चन्द्रलेखा। ]

चन्द्रलेखा:—हला मदनलतिके सुखावहोऽयं सायन्तनः समीरणः स्निग्धजनसमागम इव।

मदनलतिका—अयमेवोत्पादयति प्रमोदमियन्तम्। यदि सत्यं स एव समागतः ........।

चन्द्र:—पश्य।

गृह्णन्नामोदभारं मलयकटकतो गन्धसारद्रुमाणां
चोळीकेशावतंसप्रसवनवमधुस्तोममप्यादधानः।
विन्ध्यादद्रेः परागं मधुरमुपवहन् केतकीगर्भसंस्थं
मन्दं यातीव रागात् हिमधरणिभृतं हार्दतो मातरिश्वा॥

मदन—मन्ये वाञ्छति सख्यपि तदिवकारिणं कमपीति।

दुर्मतिः—मित्रभावेन ब्रवीमि । युद्धलाघवदर्शनव्यग्रेण यदप-
राद्धम् ........ ।

हेमचन्द्रः—तत् क्षन्तव्यमेव । किमिदमपि वक्तव्यम् ?

दुर्मतिः—[स्वगतम्] सिद्धो मे मनोरथः । रन्ध्रमन्विष्य समा-
पयाम्येनम् । [प्रकाशं] तर्हि प्रारभ्यतां विहारः ।

[ उभौ नाट्येन खड्गविहारं कुरुतः । ]

चन्द्रः—सन्निहिते निष्कुट आलाप इव । [अथः पश्यन्ती[ सखि
क एष विविक्तमिदमुद्यानमासाद्य खड्गेन विहरति ?

मदन—एष किल दक्षिणतः सेनापतिः ।

चन्द्रः—जानेऽहं दुर्मेधसमिमम् । कोऽयमन्यः संपन्नाङ्ग
इवानङ्गः ।

मदन—एष खल्वस्मन्महापारिषदस्य कलाधरमहोदयस्य सुकृत-
परिपाको हेमचन्द्रः ।

चन्द्रः—[साश्चर्यं] अयमेव स महाभागः ?

मदन—अथ किम् । अस्मै किलाचिरनिर्वृत्ते वैदेहसांपराये
निजप्राणानरक्षदिति महाराजेन रत्नकृपाणोऽयं पारितो-
षिकीकृतः ।

चन्द्र—पात्रमेवायमस्योपहारस्य ।

विवर्षिषुरिवांभोदः स्पृहणीयो वपुःश्रिया ।
स्तनितेनान्तरेणेव भयदश्च स्वतेजसा ॥१७॥

मदन—पश्यैतयोर्युद्धवैचित्रीम् ।

करकलितकृपाणौ पूर्वमभ्येत्य किंचित्
द्रुततरमपयान्तौ पार्श्वतः पृष्ठतश्च ।
प्रतिभयकरवालाघट्टनोद्यत्कृशानु-
स्फुरदमलमुखाब्जौ चक्रवद्भ्राम्यतस्तौ ॥१८॥

चन्द्र— पश्य हस्तलाघवं कविकुमारस्य । एष खलु,

ज्योतिषश्च इवाभाति पूर्वप्रसृतपाणिना ।
यत्कृपाणः परस्याशु तत्रैवापत्य शीर्यति ॥१९॥

[साश्चर्यमवलोकयन्ती] अये पराजितो दुर्मतिरधः पतति ।
[उभे सकरतालं हसतः।]

हेम—[हासदिशि दृशं प्रसारयन्] कथं सौधे सुरवनितेव ?
[सादरं पश्यति ।]

चन्द्र—[सबहुमानं वीक्षते।]

दुर्मतिः—[परस्परावलोकनं दृष्ट्वा स्वगतं] अरे धूर्त ! किं मां पराजित्य राजदारिकामपि कामयसे ?। उभयस्यापि फलमद्यैव तावदनुभावयामि । [प्रकाशं] सखे दर्शितं त्वया हस्तकौशलम् । परिज्ञाता च महनीयता पारितोषिकमण्डलाग्रस्य । परितुष्टोऽस्मि । तर्कयाम्यनागमनेन महाराजस्य—"विहारशीलस्य वृषसेनस्येदं विलासचेष्टितं"—इति अनुमन्यस्व धूर्तस्य शिक्षणसमुद्योजनाय ।

हेम—किमर्थो विहारकृतेरपि दण्डो नाम ?

दुर्मतिः—विसृज मां दूयमानमानसम् । [इति निष्क्रान्तः ।]

चन्द्र—अयि मदनलतिके ।

[इति हेमचन्द्रं निर्वर्णयन्ती तिष्ठति ।]

मदन—आकृतिविशेषः परिकर्षतीव ते चेतः ।

जानुव्यायतबाहुरस्य सकलामीष्टे भुवं शासितुं
व्यामग्राह्यकुचामधीरनयनामालिङ्गितुं वा सखीम् ।
शीर्षं रत्नकिरीटधारणपटु श्वेतातपत्रोदरे
कान्ताकैतवकोपवह्निशमने स्प्रष्टुं पदं वाऽप्यलम् ॥२०॥

[ नेपथ्ये । ]

"द्वीपान्तरादागत ऐन्द्रजालिको महामायोऽवरोधजनाय मायाविलासं दर्शयितुं सज्जो वर्तते । तदन्तःपुरचरैरखिलैः सन्निधातव्यम्" ।

मदन—अन्तर्वंशिकस्य शतबलेरिदं वचनम् । स किल अनुल्लंघ्यशासनः कन्याजनस्य । तत् त्वर्यतां गमनाय ।

चन्द्र—[स्वगतम् ।]

न विहारशीलमपि मे वांछति चेतोऽद्य मायिनं द्रष्टुम् ।
हित्वा नववारिधुनीं वेशन्तं याति मीनवृन्दं किम् ॥२१॥

[प्रकाशं] इममासेवमानाया अतिमनोहरं सविलासप्रसरमनुभावितचन्द्रलेखमनङ्गसखं दक्षिणं ।

मदनलतिका—कलाधरकुमारं हेमचन्द्रं ........ ।

चन्द्र—अलं परिहासशीले! समीरणमासेवमानाया मे नेहवे मानसमन्यतो गन्तुमिति वक्तुमुपक्रान्तम् ।

मदन–भवतु । इतो गत्वा निवेदयामि तावदंबानिकटे मनोहरं कमप्यासेवमाना चन्द्रलेखा नेच्छति मायादर्शनामिति ।

चन्द्र–अयि कथमियं मे वेणी गवाक्षगतया लतिकया दृढं संग्रथिता ?

मदन–न किमपि जाने । [इति प्रस्थितेवान्यत्र तिरोभवति।]

चन्द्र–[स्वगतं] कथमत्र क्षणमवतिष्ठे ? [पार्श्वतो दृष्ट्वा] किमियं प्रस्थितैव ।

[ हेमचन्द्रं सादरं पश्यन्ती निष्क्रान्ता । ]

मदन–किं निर्गता ? अहमप्यनुसरामि । [निष्क्रान्ता।]

हेमचन्द्रः–हन्त नष्टा मे नेत्रचकोरचन्द्रिका ।

संगुप्तचञ्चलमधुव्रतपक्षयुक्तो
मध्येविकासिनवचंपककुड्मलाङ्कः ।
मुक्ताकलापरुचिरम्यनवप्रवालः
केनाहृतो विधुरयं क्षणतस्त्वपूर्वः ॥२२॥

अनिबद्धस्यापि कचभरस्य विमोचनछलेन क्षणमवस्थाय,
प्रकटीकृतबहुमानं पश्यन्ती मां परावृत्य ।
वपुषा न संमुखीना यान्ती सा नैव याति मे हृदयात् ॥२३॥

सर्वथाऽस्तु समीक्षणमभिनवलावण्यदेवतायाः समीहित-साधनाय मे । [निष्क्रान्तः ।]

॥ प्रथमोऽङ्कः ॥

## ॥ द्वितीयोऽङ्कः ॥

[ ततः प्रविशति पर्यङ्कस्थिता चन्द्रलेखा सखी सरोजिनी च । ]

सरो—अयि चन्द्रलेखे! सादरमप्रमादमुपास्यमानापि कुतो विमनायसे ?

चन्द्र—सखि! सरोजिनि! न जाने तावदलभ्यवस्तुप्रार्थनया कति वा नेतव्यानि दिनानीति ।

सरो—किमर्थं वैक्लव्यमिदम्? वसुधायां किमनासाद्यं राजदारिकायाः ?

चन्द्र—राजकन्यापदमेवाभिलषितमतिवेलं दूरीकुरुते। पश्य ।

योषा राजकुलोद्भवा न हि पुनर्वीथीषु गन्तुं क्षमा
नैव क्रीडितुमप्यहो सकुतुकं कन्याजनैरीप्सितैः ।
न प्रेम न्यसितुं मनोभवसमे चेतोहरे वा स्वयं
हैमी शृङ्खलिकेव भूपतिकुले नूनं जनिः सुभ्रुवः ॥२४॥

सरोजिनी—"कृतसुकृता एव जनिमासादयन्ति राजकुल" इति किल वदन्ति पुराविदः । कथमिदमन्यथा संभाव्यते त्वया ?

चन्द्र—विभवमात्रपराणां मतमिदं, न तु हृदयविदाम् ।

कण्ठबद्धनवरत्नमालिका दुग्धकल्पितनवान्नभोजना ।
हेमनीडसदने रमेत किं शाखिशेखर इवेह शारिका ॥२५॥

सरो—तथ्यमिदम् । कमनुत्तममभीप्सन्ती दूयसे ? ·

चन्द्र—[सपुलकोद्भेदं क्षणं विचिन्त्य] अथवा कथयामि ते प्रियवयस्यायै ।

दृष्टः कृपाणपाणिः मनसिज इव मूर्तिमान् गृहोद्याने ।
दलयितुमिव हृदयं मे सृष्टो विधिना चिराय यत्तेन ॥२६॥

सरो—उचित एव मुग्धाङ्गनानामनुरागो रूपवत्सु । तथापि तव हृदयहारिणं कृतसुकृतं मन्ये ।

चन्द्र—मा तावत् । तस्मिन् प्रेमनिक्षेपेणाहमेव कृतसुकृता ।

वीर्यावासो जननभवनं रूपसंपन्नतायाः
केलीगेहं कमलभवनप्रीतिभाजस्तरुण्याः ।
अंभोजाक्षीमदनलतिकोपघ्नमन्दारशाखी
मूलं कीर्तेः स भवति कथं हीनपुण्याधिगम्यः ॥२७॥

सरो—भवतु । हला ! सन्दर्शनमात्रतो यदेवं संवृत्ता, तदधीरतां ते दर्शयति । पश्य ।

आहारे न रताऽसि नापि कुतुकालापे वयस्याजनै-
र्वादित्रेष्वपि नैव लास्यनिपुणा क्लृप्तेषु नृत्येषु वा ।
ध्यायन्ती सततं निरर्गलगलन्नेत्रांबुधौताधरा
निश्वासप्रसरैस्तनोषि निभृतं क्लान्तं तवेदं मुखम् ॥२८॥

चन्द्र—नन्विदं मे महतीं धृतिं दर्शयति, यदहं प्राप्याप्येतादृशीमवस्थां जीवितं धारयामि ।

द्वन्द्वे यदा दर्शितविक्रमोऽसौ
श्रुत्वा करास्फालनमस्मदीयम् ।
प्रसार्य तिर्यङ्नयनं मयीष-
ज्जहास भिन्नं हृदयं तदैव ॥२९॥

सरो—कोऽसौ तव हृदयव्याधः?

चन्द्र—[सलज्जास्मितम्] पण्डितमहोदयकलाधरकुमारः ।

सरो—किं महीपतीनुत्सृज्य महीयते मनीषितनयः । आं! ज्ञातम् । आजन्मकृतविद्यायाः फलमिदम् ।

चन्द्र—अथ किम् । विद्ययैव हि परिज्ञातमिदमजगजयोरिव महदन्तरमवनिपत्यनूचानयोः ।

सरो—कथमिदमप्येवं नाम?

चन्द्र—अथ किम् । पश्य ।

प्रायो भूपतयः स्वकीयविभवैः सर्वाधिकारेण वा
सुत्रामाणमुपागतं वसुमतीमात्मानमामन्वते ।
किं वैतैः पिहितेक्षणैः स्मयपटेनाराधनीयैः सदा
तस्मिन् राजति पण्डिते रसिकतागेहे कवीनां वरे ॥

सरो—आश्चर्यमिदं, यद्भूराधिपतनूजाया अप्येवंभूता मानसीवृत्तिरिति ।

चन्द्र—तस्य पुनर्दर्शनाय त्वरते मम मानसम् ।

सरो—अहमस्मि कार्यसाधने। रजनीमुख एव वकुलोद्यानमानेष्यामि। निर्वृता भव। [पार्श्वतो विलोक्य] कथं मदनलतिका? कुसुमचन्दनहस्ता समायाति। मन्ये तव दिनावसानप्रसाधनाय समुद्यतेति।

[ततः प्रविशति यथानिर्दिष्टा मदनलतिका।]

मदन—सखि चन्द्रलेखे! इमं पाटीरमालिम्पन्ती परिहर दिनातपखेदम्।

चन्द्र—किं मन्दभागाया ममानेन चन्दनेन? [सनिःश्वासं] वृथा बाधोद्दीपकेन।

मदन—[निपुणं निरूप्य] तमेव चिन्तयन्ती भूयोपि किं क्लेशयस्यात्मानम्।

चन्द्र—कथमक्लेशिनी भवेयम्?

अन्तर्मम वसन् सोऽयं तापमुद्दीपयत्यलम्।
पाटीरवचनं तेऽद्य वर्धयत्येव मे रुजम् ॥३१॥

मदन—दूये परं प्रियसख्याः शोकानलोद्बोधनेन।

चन्द्र—सुखनिर्वाप्यः खलु बहिर्गतो बृहद्भानुः।

सरो—अनुमन्यस्व मामासेचनकानयनाय।

मदन—त्वमसि कार्यक्षमा।

चन्द्र—गाढं गुप्तं भवितव्यम्। अनुपदमागतैव वकुलोद्यानम्।

सरो—तथा।

[इति निष्क्रान्ता।]

चन्द्र—आदिश मार्गं वकुलोद्यानस्य ।

मदन—इत इतः । [नाट्येनोभौ परिक्रामतः ।]

मदन—मन्ये शार्दूलगुहामानिनीषसि कुरङ्गमिति ।

चन्द्र—किन्न कण्ठीरवम् ?

मदन—इदमविदितं ते, यत्पुरा दुर्मतिर्हेमचन्द्रं संभावयन्तीं त्वामक्षिलक्षीचकार । स किल पराजयेन भृशममर्षितश्च ।

चन्द्र—भवतु नाम, मेषशिशुरिव मृगाधिपेन स निहनिष्यते ।

मदन—इदं वकुलोद्यानम् । शिलातलेऽस्मिन्नुपविशतु सखी ।

चन्द्र—[उपविश्य सनिर्वेदम् ।]

य: फुल्लकुसुमसौरभहारिसमीरः पुरातनोन्मुदिताम् ।
अन्तः प्रविश्य हृदयं दहतीव कथं स एवाद्य ॥३२॥

मदन—अचिरेण मोदयिष्यति । मा तमनधीरय समीरबालम् ।

चन्द्र—अपि नाम स कालः स्यात् ?

चक्षुर्द्रष्टुं स्पृहयति पुनर्नेत्रपीयूषभूतं
प्रेमालापश्रवणकुतुकं सन्ततं श्रोत्रयुग्मम् ।
आविष्कर्तुं प्रणयमधिकं सोत्सुकं मानसं मे
जाने नाहं लषति नियतिः किन्तु वा संविधातुम् ॥

मदन—धीरा भव । नागमिष्यत्यकृतकार्या सरोजिनी ।

चन्द्र—त्वं दृष्ट्वा रूपतोऽपि लज्जत इव हृदयम् ।

मदन—ननु परस्परानुरूपौ भवन्तौ ।

चन्द्र—मयि सौहार्दादित्थमाकलयसि ।

स्पृहणीयस्तरुणीभी रूपवतीभिः स नूनमखिलाभिः ।
का वा भविष्यति पुनः कृतसुकृता तस्य हृदयमारोढुम् ॥

मदन—अकारणमाकुलासि । स किल दृष्टमात्रामेव त्वामुत्फुल्लनयनः स्मेराननश्च सुचिरं पश्यन्नेव यद्वतस्थे .... ।

चन्द्र—अप्येवम् ?

मदन—अथ किम् । तत् त्वयि कृतानुरागमेव मन्ये ।

चन्द्र—प्रियं मे, तथापि ।

राजकन्येति बद्धश्चेदनुरागो न शर्मणे ।
यद्यकारणसंजातः सोऽनपायसुखाय मे ॥३५॥

मदन—अदृष्टपूर्वा त्वमसि तस्य । कथमयं जानीयात् त्वां राजदारिकाम् ?

चन्द्र—यद्येवमकारणानुरागबन्धेन तस्य कृतभाग्याऽस्मि ।

यदि स नरपुंगवोऽनुकंपां मयि निक्षिप्य समागमिष्यति ।
चिरसुकृतमद्य संचितं तत्फलदमहो नितरां भविष्यति ॥

मदनलेखा—[श्रुतिमभिनीय] दक्षिणतो नूपुररव इव ।

चन्द्र—[सभयोत्कम्पमासनादुत्तिष्ठति ।]

मदन—[ससन्तोषं] संप्राप्तं जीवितफलम् । पश्य, सरोजिनी-दर्शितमार्गो हेमचन्द्रः समायाति ।

अंसावलम्बिनवलोहितपट्टचेलः
कस्तूरिकातिलकशोभितफालदेशः ।
हस्तावभासिमणिचित्रितरत्नवेत्रः
आयाति मत्तकलभः कटकादिवाद्रेः ॥३७॥

चन्द्र—कथं स एव । [उद्ग्रीवा पश्यति] ।

[ततः प्रविशति यथानिर्दिष्टो हेमचन्द्रः ।]

हेम—अपि कुशलं राजदारिकायाः ?

चन्द्र—[अवनतवदना तिष्ठति ।]

मदन—शिलातलमिदमलङ्करोतु प्रियवयस्यः ।

हेम—उपविशामः । [उपविशति]

चन्द्र—[स्वगतं] ।

कृतनिश्चया पुरा यैः व्यवहर्तुं प्रथमदर्शने त्वस्य ।
वचनानि निर्गलन्ति न कण्ठात्तानीह किं कुर्वे ? ॥

सरो—कथमस्यागतं प्रियातिथिमपूजयन्त्यनुत्तराऽसि ?

चन्द्र—[स्वगतं] अक्षमाऽसि, किं क्रियतां ?

मदन—पश्यन्तीमपाङ्गेनाऽऽलिखन्त्यङ्गुलिना भुवम् ।
लज्जानतदरस्मेरमुखी किम्वाद्य तिष्ठसि ॥३९॥

हेम—अकलङ्कवदनसोमो मन्दाक्षघनेन किन्तु संछाद्यः ?।
चिरतरमुपोषितो मम दीनतरो नयनचातकस्तन्वि ॥

चन्द्र—[स्वगतं] किं प्रतिपद्येय ?

मदन—[साहसं] अद्य शुक्रवासर इति मौनव्रतमाचरति नः प्रियसखी। तदविज्ञाय भवानभ्यागतः।

[ सर्वे हसन्ति । [

चन्द्र—[सलज्जं लीलाकमलेन मदनलतिकां ताडयति ।]

मदन—कुतो मां ताडयासि तत्त्वमविज्ञाय समागते प्रियवयस्ये ?

चन्द्र—[सलज्जं] आर्य ! स्वागतमत्रभवते।

हेम—[स्वगतं]

किमसौ पिकाङ्गनायाः परिवादिन्याः समुद्गतो निनदः।
अन्तःप्रविश्य हृदयं तरलीकुरुते कथं मेऽद्य ॥४१॥

[प्रकाशं] स्वागतमेव भवतीनां सविशेषं प्रेमोपचारेण।

मदन—आर्यस्य रूपवीर्यातिशयेन क्रीतेयमस्मत्प्रियसखी।

हेम—न मेऽस्ति प्रतिपणं भवत्या वयस्यायामर्पितात्मनः।

मदन—कृतसुकृतैवावयोः प्रियसखी भवतः प्रेमलाभेन !

हेम—किं न हेमचन्द्रो युवयोः सख्याः ?

सरो—आवामपि सख्यौ संयुक्तप्रणयिदम्पतिदर्शनेन।

हेम—सौधमध्ये यदा दृष्टा स्मेरवक्त्रा तदैव मे।
गात्रं च हृदयं प्राणाः अर्पिता मदनाज्ञया ॥४२॥

मदन—[सोत्स्मयं] मन्ये सख्योः पुरतः प्रियसखस्य पार्श्वमधि-
ष्ठातुं लज्जते चन्द्रलेखेति । तदेह्यपसरावः ।

सरो—यदि प्रियवयस्य एव करेणालम्ब्य सम्मुपवेशयति ?

चन्द्र—[सासूयं सरोजिनीं पश्यति ।]

हेम—अनुचितमिदं स्थित्वा शिरीषकोमलयोः चरणयोः
क्लेशनं नाम । पार्श्वासनमलङ्करोतु प्रियसखी ।

मदन—अनुपालनीयवचनः प्रियसखः । उपविशतु सखी ।

चन्द्र—[ सलज्जा तिष्ठति । ]

हेम—सख्योरपि तावन्मनोरथं पूरयतु भवती । [इति हस्तेनालम्ब्य
तां पार्श्वे उपवेशयति ।]

चन्द्र—[स्पर्शसुखमभिनयति ।]

हेम—[सपुलकं] धन्योऽस्मि ।

[नेपथ्ये]

सायं हि नन्दनवने सह कन्यकाभिः
याता विहर्तुमधुनापि न राजकन्या ।
सौधं समागतवतीति विचिन्तयाऽत्र
संमार्गते परिजनो भृशसंभ्रमेण ॥४३॥

[सर्वेश्रुत्वा विषीदन्ति] ।

मदन—[सखेदसंभ्रमं] आः ! विधेर्विलसितं ।

सरो–सखि! आमन्त्रयस्व प्रियसखं पुनर्दर्शनाय ।

चन्द्र–अनुमन्यतामियं प्रियेण मन्दभागा ।

हेम–[निर्वचनस्तिष्ठति] ।

मदन–प्रागेव परिजनागमनात्प्रस्थातव्यम् ।

हेम–कोऽहं प्रतिषेद्धुम् ?

सरो–भवताऽपि निगूढेन पथा गन्तव्यम् ।

मदन—[त्वरयति] ।

चन्द्र–क्षमतामार्यः । प्रसीदतु पुनर्दर्शनाय ।

हेम–[करं गृह्णन्] प्रिये !

त्वादाश्रयमिदं गात्रं मनः प्राणाः सुखानि च ।
शपते हेमचन्द्रोऽयं निशाशीतांशुसाक्षिकम् ॥४४॥

मदन–अविशेषमिदमस्मत्प्रियसख्या अपि ।

सरो–[सभयं] शब्द इव ।

चन्द्र–आर्य! [इत्यर्धोक्ते गद्गदकण्ठा तिष्ठति] ।

मदन—नूनमचिराद्द्रक्ष्यासि । स्थिरा भव ।

चन्द्र—बद्धाऽहं राजकन्येति पञ्जरे हेमकल्पिते ।
तद्भवानवमुच्यारात्प्रमोदयितुमर्हति ॥४५॥

हेम—तथा निर्वृता भव ।

सरो—आर्य! भवताऽपि त्वरितमपसार्यताम् ।

[प्रविश्य पटाक्षेपेण दुर्मतिः ।]

दुर्म-[सासूयं] दृष्टं यदभिशङ्कितम् ।

[सरोषं वीक्षते] ।

हेम-विस्रब्धं यातु भवती । अजेयः पुनः सहस्रैरपि हेमचन्द्रः ।

चन्द्र-[सादरं पश्यन्ती सखीभ्यां निष्क्रान्ता ।]

हेम-[सगद्गदं] ।

करस्थमपि तत्कृत्वा मधुरं वस्तु दुर्लभम् ।
आच्छिद्य गच्छन्समये किमयं कुरुते विधिः ॥४६॥

[निष्क्रान्तः] ।

दुर्मतिः-अरे दुरात्मन् । महाराजे निवेद्य करोमि कर्तव्यम् ।

[निष्क्रान्तः ।]

॥ द्वितीयोऽङ्कः ॥

---

## ॥ तृतीयोऽङ्कः ॥

[ततः प्रविशति हेमचन्द्रः स्वावासस्थः ।]

**हेमचन्द्रः**—[सनिःश्वासं ।]

द्रष्टुं यां न सहस्रदीधितिरलं सा नेत्रभूमिंगता
प्रेम्णा चालपितं क्षणं मृगदृशा पुण्येन पूर्वेण मे ।
व्याहन्तुं प्रमदं तु धूर्तविधिना किं किं न निर्वर्तितं
मन्ये प्राणभृतां बलेन नियतेर्न स्तोकमानन्दथुः ॥

[ सस्मरणं । ]

ईषत्स्मितप्रकटितप्रबलानुरागा
कंपाकुलोत्पुलकसङ्कुचदङ्गयष्टिः ।
ऊरीकृतालिवचनेव यदास्त पार्श्वे
तत्सर्वदापि हृदये परिवर्तते मे ॥४८॥

अरे ! दुर्विदग्धविधे ।

अचिन्तितमुपस्थाप्य कारयित्वा च तद्वशे ।
विघटय्य क्षणेनाद्य क्रीडता किमिवार्जितम् ॥४९॥

अथवा तथा भूत एव त्वम् ।

ग्रीष्मेऽपि नीलजलदं गगने वितन्व-
न्नुद्धहर्बर्हिणमपि स्तनितेन हंसि ।
उत्पाद्य शीतकिरणेन मनोजखेदं
तेनैव चक्रयुगलं विधुरीकरोषि ॥५०॥

किमनेन यातनामात्रपरितुष्टेन विधिना। संहृताशुगेन कुसुमशरेणैव रक्षणीयोऽस्मि।

कुरु मदन मां विशोकं कुवलयदललोचनाहृत्तापम्।
निरुदररमणीयतनुं रमणीं तां संविधेहि मम सविधे॥

कथं! त्वमपि तस्यैव दैवहतकस्य किङ्करः संवृत्तः। हन्त!

दूरे स्थितामपि विधाय दृशोः समक्षं
बाणाहतिक्षपितधैर्यमिमं तनोषि।
क्रन्दन्तमार्तवचसा दयिते ममेति
पश्यन्प्रतुष्यसि मनोज! हृदन्तरे किम्॥५२॥

प्रभो! मदनराज! नायं परिहासकालः।

[ सातङ्कम्। ]

पश्यामि सुन्दरतनुं परितः प्रियां तां
वाक्यान्यमेयमधुराणि शृणोमि तानि।
अन्तः क्षणं, नयनयोः क्षणमपि, त्यजस्रं
सा सन्निधाय सहसैव कुतोप्यपैति॥५३॥

अयि चन्द्रलेखे!

यदालीं समभिप्रेष्य समागत्य च निष्कुटम्।
स्वागतं यदवोचस्त्वं कुन्तत्यजापि तन्मनः॥५४॥

[ सरोमाञ्चम् । ]

पुलकयति शरीरं स्मर्यमाणं त्विदानीं
मयि करपुटमादावामृशत्यम्बुजाभम् ।
यदियमुपगता स्वोत्कंपिगात्रे निदाघं
रसतरलितचेता वल्लरीवाकुलाङ्गी ॥५५॥

कदा द्रक्ष्यामि पुनस्तामसितकेशाम् ?

धम्मिल्लो न हि शिञ्जिनीदृढगुणः पञ्चाशुगस्यैव सः
किं कल्हारपृषत्क एव नयनोपान्तेक्षणं वा न किम् ।
नूनं हेतिरयं चकास्ति पुरतः सीमन्तकच्छद्मना
मन्ये मन्निधनाय सर्वमतुलं सृष्टं तु दुर्वेधसा ॥५६॥

[सभयं] कथमस्मत्तातपाद इव ।

[ ततः प्रविशति कलाधरः । ]

कला:—नहि सुखदमात्मजोपममखिलानां प्राणिनामत्र ।
इहपरकुशलीकरणान्मनुजानां प्रेम सविशेषम् ॥५७॥
[परिक्रामति ।]

हेम:—[सविनयं] तात! अभिवादये । [इति प्रणमति ।]

कला:—अभिमतेन युज्यस्व । वत्स! राजसंमानित इति दिष्ट्या न गर्वितोऽसि ।

मूढास्त्वल्पस्य लाभेन गर्वान्धितविलोचनाः ।
तृणीकुर्वन्ति विदुषः पूजनार्हान्महात्मनः ॥५८॥

हेम:—कथं मम दर्पलेशस्यापि संभवः ? ।

कारणद्वितयेनापि भवान्विज्ञो हि मे गुरुः ।
जनकत्वेन विद्याया दातृत्वाच्च विशेषतः ॥४९॥

कलाः–परितुष्टोऽस्मि ते विद्यानुगुणेन विनयेन। शृणु मे हितं ते भविकाय।

राजानश्चपला विचारविकला तीक्ष्णाश्च शीघ्रक्रुधः
तत्तत्कालसमीहितार्थघटकैकाकृष्यचेतोगुणाः ।
मा विस्रंभमुपेहि वत्स! दयिते तस्मिन्नपि क्ष्मापतौ
प्रायो दूरतटे स्थितिः सुखकरी जीवाय मानाय च ॥

हेम:—अवहितोऽस्मि ।

कलाः—भवतु कोऽयं समायाति? कीर्तिकेतुरिव!

[ ततः प्रविशति कीर्तिकेतुः । ]

कीर्तिकेतुः—[ स्वगतं । ]
एतौ स्पृहणीयतमौ सुकवी जनकात्मजातौ च ।
मृगमृगमदौ यथा वा सुममकरन्दौ च मल्लिकावल्याः ॥

कलाः–आर्य! अपि कुशलं! ।

कीर्तिः–कुशलमेव भवादृशां सवयसां प्रेमपात्रतया ।

हेम:–आर्य अभिवादये ।

कीर्तिः–सिद्धसमीहितो भव ।

कलाः–परिगृह्यतामिदमासनम् ।

कीर्तिः—तथा ।

[ सर्वे उपविशन्ति । ]

कला—भवदागमनमस्मद्भविकोदयं मन्ये । यतः—

सर्वथा राजसदने कृतसत्कारनिर्वृतः ।
यदि याति तदन्यस्य गृहं तस्यैव भूतये ॥६२॥

कीर्ति—नेदमन्यगृहं मम ।

कला—उचितमिदं । स्वकीयमेव सकलमपि भुवनं पण्डितानाम् ।

कीर्ति-न हि लोकवार्तामनुरुध्य ब्रवीमि । शरीरं खलु भवान्मम ।

कला—कृतसुकृतोऽहं । हेमचन्द्र! अपि ग्रथितं मानवकर्तव्य-मधिकृत्य श्लोकशतम् ।

हेम-अथ किम् । [इति लेखं ददाति] ।

कला—अवलोकयतु भवान् । [इति कीर्तिकेतुहस्ते समर्पयति ।]

कीर्ति—[गृहीत्वा वाचयति] ।

नीपाटवीपरिसरोत्पलिनीतटान्ते
शीतद्युतिच्छविविभूषितगौरपीठे ।
पार्श्वे निवेश्य पटुवाचमधीरनेत्रां
प्रेम्णाऽऽलपेद्रहसि यः स कृती मतो मे ॥६३॥

किं च

अंभोजरागरमणीयतनुं कृशाङ्गीं
कुंभोन्नतस्तनभरां कुहनावलग्नाम् ।
भ्रूभङ्गसीत्कृतिमिषेण निषेधतीं तां
आलिङ्ग्य पेयमधरं जनिलाभहेतोः ॥६४॥

कला-[सवैक्लव्यं] अलमलम्। कुत्रेदमभ्यस्तं मानवकर्तव्यमिति।

हेम-किमिदं न पुरुषैरर्थ्यमानम्?

कला-पुरुषार्थमात्रेण न कामः सेव्यः। [साशङ्क] कथमस्य नवीनो मतिविपर्ययः?

कीर्ति-ज्ञातमिदानीं मतिरस्य विपर्यस्तेति।

कला-कथमिदम्?

कीर्ति-अयमहिवरशीर्षाद्रत्नमादातुमिच्छ-
त्यहह जलधिगर्तात्कांक्षते मौक्तिकं च।
मधु च बहुलदुर्गात्कन्दराद्दन्तिहन्तु-
र्यदभिलषति कन्यां भूपतेश्चन्द्रलेखाम् ॥६१॥

कला-किम्? किमुच्यते भवता?

कीर्ति-एष किल हेमचन्द्रो राजदारिकां चन्द्रलेखां सानुरागं अनुरञ्जयतीति दुर्मतिना समाक्षिकं राजा विज्ञापितः भृशममर्षितश्च।

कला-हेमचन्द्र! कच्चित्सत्यमिदम्?

हेम-परस्परमनुरागेण बद्धौ स्वः।

कला-मैवम्। मन्ये त्वां कालपाशबद्धम्। यतः

प्राणानपि परित्यज्य मानं रक्षन्ति मानवाः।
क्षत्रजातिर्विशेषेण तत्राप्येष महीपतिः ॥६६॥

कीर्त्ति–तत्वमिदम् । स किल गुप्तमन्त्रः स्वयमेव परीक्ष्य शिक्षितुं कृतयत्न इति श्रूयते ।

कला–वत्स! हेमचन्द्र!

दहतीव कलेवरं पुनः सुभृशं कंपयतीव मस्तकम् ।
चरणौ कुरुते त्वसंस्थितौ हृदयं मे दलयत्यलं वचः ॥

हेम–ननु वदामि न सा मया वशीकृतेति ।

कला–प्रार्थयतां वा स्वयमेव । नास्मादृशानां कन्यीनामुपभोग्या सा । निश्चितु तदलभ्यं वस्तु । निधनावसानं च ।

हेम–किं पदार्थान्तरमिव प्रेमापि सुलभनिर्हार्य्यम् ।

वस्तुगुणमविमृशन्किल याति पदं प्रेम दर्शनादेव ।
तस्मात्पुनरुद्धर्तुं कृच्छ्रादपि शक्नुवन्ति नैव धीराश्च ॥

कला–अपि न ते निधनायैवेदमुपस्थितम् ।

कीर्त्ति–हेमचन्द्र! मावमंस्था गरीयांसं ते पितरम् ।

{ तत्कालप्रियभूतेन वचसा किन्तु दुर्हृदः ।
भाविशर्मपदं ग्राह्यं कटुप्यार्यस्य भाषितम् } ॥६९॥

कला–अत्र किल सचिवः सर्वपालः ।

[प्रविश्य]।

सर्वपालः–आर्यौ वन्दे।

कला–अपि कुशलमवनिपतेः ?

सर्व–अथ किं। आवेदयति महाराजः .... ।

"श्वः किल व्रतसमापनदिने कृतनिश्चयोऽहं सुहृद्भिः पारणां कर्तुम् । तत्कुमारहेमचन्द्रेण शिष्यवर्गेण चात्रभवतामागमनमादरेण प्रतिपालये" इति ।

कला–[क्षणं विचिन्त्य] विज्ञाप्यतां महाराजः। "अनुगृहीता वयमिति"।

सर्व–तथा । [इति निष्क्रान्तः]

कीर्ति–वयस्य किं भवान्मन्यते सहभोजनसमाह्वाने कारणम्।

कला–न किंचिदपि स्फुरति मे। अक्षिणीनिबध्य अरण्यान्यामुत्सृष्ट इवास्मि ।

कीर्ति–गूढकृतिमेव गोत्रापतेस्तर्कयामि, हेमचन्द्र निभृतं जागरूको भव ।

हेम–तथैव ।

कला–साञ्जलिबन्धम् ।

परिवादिनीकराब्जे पङ्कजरिपुसोदरच्छाये ।
परिरक्ष परे भारति मातः परमेष्ठिमनासमरालि ॥७०॥

[इति निष्क्रान्तः] ।

॥ तृतीयोऽङ्कः ॥

---

## ॥ चतुर्थोऽङ्कः ॥

[ ततः प्रविशति शतानन: ।]

**शतानन:**—[साटोपं ।]

प्राणमात्रावपि त्यक्त्वा प्राप्यमन्यत्र भोजनम् ।
जन्मजन्मसु च प्राणा मान इत्यन्धजाल्पितम् ॥७१॥

[सहासं] अयि रसने "टिड्ढाणञ्द्वयसज्दघ्नजि"ति कटुकं रटन्त्या लब्धं फलं ते; यदद्य भुक्तं राजसदने महाराजस्य सविध एव। अहो! सद्धेर्विशेषः। [इति पप्पटिहस्तः परिक्रामति । [प्रविश्य कामन्दकः पप्पटीं चूर्णयति ।]

**शता:**—अरेरेरे !!! हा! हन्त! काकेन मे चूर्णिता पप्पटी।

**काम:**—काकस्तेऽहं कामन्दकः? [इति नुदति ।]

**शता:**—किं कामन्दकः । सञ्चित्य देहि मे पप्पटी शकलानि ।

**कामन्दकः**—अरे! आकण्ठं भुक्त्वा बुभुक्षितं किमेवमवहेलयसि? सत्यं वद । कुत्रवाऽशनमशितम् । अन्यथा पाठनोन्मुखं तवोदरं मुष्ट्याऽनया पाटयामि ।

**शता:**—मैवं मैवं। क्षमस्व! कांचिद्विश्रान्तिमुपलभ्य ब्रवीमि। [इत्युदरं परामृशन्] अद्य किल राजसदने राज्ञो व्रतसमापनमुद्दिश्य महदाराधनं कृतं पण्डितानाम्। अहमपि पण्डितकलाधरशिष्यपदवीमनुतिष्ठन् तत्र गतः। अहो! भोजनसभाजनम् ।

काम-अरे! विस्तरेण कथय भोजनसंविधानम् ।

ज्ञाता:—शृणु रे शृणु!

सूपं घृतं पायसं च-माषा-
  पूपं गुलापूपमाज्येन क्लृप्तम् ।
पोली पयः पूरमग्ना-शाक-
  पालीकृतंकिञ्चिदज्ञातपूर्वम् ॥७२॥

गोधूमक्लृप्ता च हल्वा-एला
  साधूक्षिता मोदका लड्डुकानि ।
सा शष्कुली चालनीव-हन्त
  काचप्रभा पप्पटी बुद्बुदाढ्या ॥७३॥

ता एव तास्तानि तानि ।

कामः—भाग्यवानसि !

ज्ञाताः—नैतावन्मात्रं । सर्वाण्येतानि तयैव महाराजकुमारिकया कनककङ्कणकलकलिताभ्यां कराभ्यां परिवेपितानि ।

कामः—अहो पाटच्चर । कथमिमं विस्मृत्य गतोऽसि?

ज्ञाताः—न हि विस्मृतो भवान् प्रियसखः । भोजनसमयेऽपि त्वामेवाहं चिन्तयन्नस्मरमलंकथनमपि ।

काम-भवतु। कथय तावदिदानीं कुत्र वा गत्वा ममोदरं पूरयेयम्।

ज्ञाता-गच्छ तामेव सरोजिनीं राजसुताया वयस्याम् ।

काम-कथमेषा वराकी स्वोदरपूरणैकपरा मां भोजयिष्यति दास्याः पुत्री ।

श्वता—सैषा सरोजिनी शृण्वन्ती समायाति ।

काम—[सभयं] नष्टावावाम् । एहि पलायावहे ।

[निष्क्रान्तौ]

[ततः प्रविशति सरोजिनी कुसुमकुङ्कुमहस्ता] ।

सरोजिनी—अज्ञप्ताऽस्मि देव्या दयावत्या अविज्ञातकारणं कृशीभवति ते सखी चन्द्रलेखा । तस्या भाग्योदयायाऽद्य पूर्णिमायां सीमतटस्थां कुलदेवतां भवानीं सम्यगाराध्य आप्तप्रसादां कुरु तामिति । तद्भगवतीप्रसादमिमं तस्यै नेष्यामि । [इति परिक्रामति] ।

[ततः प्रविशति मदनलतिका] ।

मदनलतिका—सरोजिनी!

सरो—अयि! सख्याः सकाशादागतां त्वां मन्ये । अपि निर्वृता चन्द्रलेखा ।

मदन—कथं? प्रसक्तिरपि निर्वृतेः । पूर्वं विरहपीडितायाः अद्यतनसंभवेनातिशङ्काकलुषितं चेतः ।

सरो—कुतोऽतिशङ्का ।

मदन—अद्य किल महाराजो व्रतसमापनमुद्दिश्य भोजयामास विपश्चिद्वर्गम् ।

सरो—मन्ये हेमचन्द्रोऽपि समानीत इति ।

मदन–अथ किम् ?। तदा किल पण्डितेषु बहुमानेन चन्द्र-
लेखामेव परिवेषयितुं नियोजयति स्म महाराजः।

सरो–सत्यं नियतिचोदितोऽयं सन्दर्भो हेमचन्द्रपुनर्दर्शने-
नात्मनः सफलीकरणाय वयस्यायाः।

मदन–तेनैव किल महदत्याहितं संवृत्तम्।

सरो–[सोद्वेगं] कथमिव ?।

मदन–मध्यत आसीनं राजानं परिवार्य कृतभोजने पण्डित-
मण्डले, परिवेषणाय चन्द्रलेखा भक्ष्यहस्ता मन्दमुदगा-
दन्तर्गृहात्।

सरो–किमीक्षिता सानुरागं हेमचन्द्रेण ?।

मदन–न समीक्षणमात्रतस्तुष्टः। वर्णयितुमपि प्रवृत्तः।

सरो–कम्पते हृदयम्। कथं वर्णितं वयस्येन।

मदनः–क्षौमं वासः शशधरकलापाण्डरं धारयन्ती
काञ्चीदाम्ना प्रकरमणिकेनोहनीयावलग्ना।
स्मेरास्यश्रीविदलितनवश्वेतपङ्केरुहाभा
.... .... .... .... ॥७४॥

सरोः–यथार्थं वर्णितं हेमचन्द्रेण।

देशकालावनालोच्य विषये समुपस्थिते।
मनःकपाटमुद्धाट्य प्रेम निष्क्रामति क्षणात् ॥७५॥

किं कृतं तदा महाराजेन ?

मदनः—सरोषं स्फुरिताधरं च समीक्ष्य .... ।

सरो०—कच्चिच्छिक्षितमपि ?

मदनः—स किल दण्डयितुमेव समुद्युक्तः ।

ततस्तु परिज्ञाततत्वेन पित्रा कलाधरेण क्षणात्तुरीयः पादोऽन्यथाऽऽपूरितः ।

सरो०—आशुकवी किल जनकतनयौ । कथमापूरितम् ?

मदनः—'विद्यादेवी कलयतु शिवं मङ्गलानां विधात्री' ॥ इति ।

सरो०—अहो ! समयकौशलं कलाधरस्य ।

अन्त्यपादपूरणं किं तथ्यममन्यत महाराजः ?

मदनः—स किल शङ्कमानो दुर्मतिं साकूतमवैक्षत । आकांक्ष-माणोऽपि तस्य दण्डविधानं वाणीस्तुतिरित्यपह्नुततया नापारयत्पण्डितसविधे शिक्षितुं, नापि दुर्वक्तुम् ।

सरो०—किमित एव तयाऽतिशङ्कितम् ?

भवतु कुत्राद्य प्रियसखी ?

मदनः—अद्य किल चन्द्रलेखा "परिवेषणश्रमेण खिन्नचरे-णेति" सुखमारुतं विविक्तं सरोवरोद्यानं आसेवितुमुद्यता । अहमपि तत्पार्श्ववर्तिनी भवितुमाज्ञप्ता । त्वमपि प्रिय-सख्याः क्लेशितायाः आरोग्यकृते भगवतीमाराधयितुं नियोजितेति देव्या भणितम् । मन्ये तदेतन्निर्वर्त्य निवृत्तेति ।

सरो–अथ किम् ।

मदन–भवतु । नालमिदमिदानीन्तनमस्या उद्वेगमुपशमयितुम् । गच्छ, तमेव हेमचन्द्रं गूढपथेन समानय तत्सरसीतटोद्यानम् ।

सरो–किमिदमपि साध्यं नाम ।

मदन–शङ्कतां वा महाराजः । तस्य प्रतारणायैव चरणरुजा प्रतीकारव्याजेन तद्दूरस्थमेकान्तं निष्कुटं गन्तुमुद्युक्ता प्रियसखी । कोवाऽन्यस्तत्र समागमिष्यति ।

सरो–उचित एवायं तटः । आनयामि त्वरिता हेमचन्द्रम् । पूर्वं सङ्कृत्य प्रियसखीमुपनय भवानीप्रसादमिमम् ।

[इति ददाति] ।

मदन–तथा । [निष्क्रान्ते] ।

[॥ विष्कम्भः ॥]

---

ततः प्रविशति दुर्मतिः ।

दुर्मतिः–शस्त्रे च शास्त्रनिचये चिरसङ्क्रमेन
लब्धा मतिः किमिह मे वितथैव सर्वा ।
यन्नूतनेन विजितः स्तुतिजीविकेन
तस्याः पुरो वसुमतीपतिकन्यकायाः ॥७६॥

[सरोषं] रे मगधापशद ! मावह वृथा गर्वं राजदारिकामानसहर इति, अथवा "सांयुगीनस्य सेनापतेरपि मे विजेतेति ।

तदा किल सख्यामुज्जीवितो जनकेन कलाधरेण, अथवा दैवेन। अधिगच्छ मम मुष्टिगतप्राणमात्मानम्"। समक्षमेव पश्यतः ते मन्मनोहारिणीं चन्द्रलेखां वशीकृत्य तत्सन्निध एव यदि नोत्प्राणयामि त्वां नाहं दुर्मतिर्न वा सेनापतिः। [सचिन्तं] कुत्रवाऽहं प्रस्थितः? [सस्मरणं] आं! वशीकरणाय चन्द्रलेखायाः नियोजितया हेमलतया विश्रमाय रम्यसरोवरोद्यानं प्रस्थितां चन्द्रलेखामनुगन्तुमादिष्टः। [परितः पश्यन्] किमहमनवगत-गतिश्चिन्ताकुलतया स्वयमेव तदुद्यानमागतः। अहो रमणीयेयमुपवनतटी।

सेरास्या कुन्दकुसुमैः फुल्लगुच्छोद्गमस्तनी।
आलपन्ती पिकारावैश्चन्द्रलेखेव राजते ॥७६॥

अनागतेव प्रतिभाति चन्द्रलेखा। [सदृष्टिक्षेपं] इतो दूरान्मदनलतिकाकरमवलम्बमाना समागच्छति चन्द्रलेखा। अहो लावण्यातिशयोऽस्याः।

अङ्गेन हाटकलताविभवावधीरि-
भासाऽद्य माधववधूमयमोहनाङ्गम्।
चिक्कर्तुमेव वसुधामसुधाभिलाभात्
रुष्टेन दैत्यगुरुणा किमियन्तु नीता ॥७८॥

अयमेव समयः सखीमात्रसहायतया तामालपितुम्। तदात्मानमुपस्थापयन्नभिलषितं संपादयामि। [सचिन्तं] अथवा यावदपारगदस्या हृदयपरिवर्तिनं हेमलतयाविज्ञाय न युक्त

प्रत्यक्षतो गन्तुम् । तद्गुल्मान्तरितो भूत्वा शृणोमि तावद्विस्रंभ-जल्पितमनयोः । [इति पादपान्तरितस्तिष्ठति ।]

[ ततः प्रविशतश्चन्द्रलेखा मदनलतिके । ]

चन्द्रलेखा—सखि! मदनलतिके! व्याकुलितचेतना न पारयामि कर्तव्ये । तदप्रमत्ता नय माम् ।

मदन—पेशलतया शरीरस्य म्लायसि परं मृणालमिव । अयं पुन्नागतरुमूले स्फाटिकः प्रस्तरः । उपविश्यताम् ॥

चन्द्र—[सायाससुपविशति] ।

दुर्ग—[स्वगतं] किमस्याः कलुषताया निदानम् ।

मदन—माऽऽत्मानमायासय । धीरा भव ।

चन्द्र—न संभवति ममाश्वासस्तं विजित्वरमेव चिन्तयन्त्याः ।

दुर्ग—[स्वगतं] कोऽयं वीरः? किन्वहम् ।

मदन—न हि स दुरधिगमः । विस्रब्धा भव ।

चन्द्र—सीदामि पुनः पितुश्छन्दमालोच्य ।

दुर्ग—[स्वगतं] मन्ये हृदयचोरोऽस्या अहमेव । पाञ्चालभूपतेः कुमाराय प्रदातुमात्मानमुद्युङ्क्त इत्यस्या वैमनस्यम् ।

मदन—कथमाचरिष्यति सुताप्राणो महाराज एकतनया-यास्तवाशयविरुद्धम् ।

चन्द्र—न विश्वसिति हृदयं मुधाऽवष्टम्भकं तातम् ।

मदन—देव्या सम्प्रयोजितः करिष्यत्येव ते प्रियम् ।

दुर्म—[स्वगतम्] नास्फुरदिदं मम मूढस्य ? यद्देवी दयावती प्रथममनुकूलयितव्येति ।

चन्द्र—तपस्विनी सा व्यवसायिनि राजनि कथं प्रभविष्यति ? ।

मदनः—निर्वृता भव । सर्वं सर्वमङ्गला संविधास्यति ।

चन्द्रः—किं तथ्यमेव त्वदुक्तं, यदत्र स समागमिष्यतीति ?

मदनः—न हि मयोक्तमसत्यम् ।

दुर्मः—[सोत्साहं स्वगतं] हेमलते ! सुविहितं त्वया चतुरया । यदत्र समागमिष्यामीति पूर्वमेवोक्त्वा प्रस्थापिता चन्द्रलेखा ।

चन्द्रः—स सन्निधास्यतीति परितुष्यति भृशं मम मानसम् ।

मदनः—युक्तमेव । तत्सन्दर्शने विस्मरिष्यसि सख्यावप्यावाम् ।

दुर्मः—[स्वगतं] किमर्थं मया मुधा विलम्ब्यते वर्धयताऽस्याः कौतुकम् । [इति पुरः परिक्रामन्] किमेतद्दूरे [निर्वर्ण्य, सकौतुकं] सरोजिनी किल समायाति । [साशङ्कं] कोऽसावस्याः पृष्ठतः ? कथं हेमचन्द्रः ? सरोजिनीमुखेन किमयं चन्द्रलेखां वशीकर्तुं विविक्तमिदमायाति निष्कुटम् । [सरोषं] आः पापाधम ! मागधवृत्त्या राजानमाश्रित्य किं तद्दारिकामप्यनुकूलयसि ? नेयं समीहते मां द्रष्टुमपि त्वयि जीवति । दिष्ट्या त्वमद्य निष्प्रहरणः । कृपाणपाणिरहं यमसदनं प्रेषये त्वाम् ।

[इति निष्क्रान्तः ।]

चन्द्र—कथं वां विस्मरिष्यामि ।

रत्नाकरं पतिं प्राप्याप्यमराणां तरंगिणी ।
कथं स्थितिं लभेतात्र तटीभ्यां यदि वर्जिता ॥७९॥

मदन—सखि प्रीणयसि भृशं सौहृदेन । अपि तमासाद्य पतिं प्रमुदितां त्वां पश्यन्ती कृतकृत्या भवेयम् ।

चन्द्र—[सबहुमानं] मन्ये नियतिकृपयैव लब्धमिदं सखीयुगलम् । [सवैक्लव्यं] कथं विलम्ब्यते सरोजिन्या ? कच्चिन्न संदृष्टः ? अथवाऽलब्धसमागमावसरः क्लिश्नाति ? उत संरुद्धगतिः सेवकवर्गैः ।

मदन—भवतु । यद्वा तद्वा सर्वानपि विलोभ्य नूनमानेष्यति सरोजिनी ।

चन्द्र—तथैव मन्ये मम हृदयतोषातिरेकात् ।

[ ततः प्रविशति सरोजिनीमनुगतो हेमचन्द्रः । ]

मदन—अहो ! प्रियवयस्यः ।

चन्द्र—[सहर्षं उत्तिष्ठन्ती स्वगतं] कथमयं परिश्रान्त इव ।

मदन—किमनन्तरायमागमनम् ।

हेम—अथ किम् ।

सरो—अद्य किल प्रियसखीमभिप्रस्थितो वयस्योऽन्तरा कयाऽपि यदृच्छयाऽऽगतया दृढमालिङ्गितः । तत एव च विलम्बितागमनः ।

चन्द्र—[स्वगतं सासूयं] केयमन्तरायिता स्वयङ्कृतालिङ्गना च।

मनद—का वा सा बहुमता? वयस्यस्य।

सरो—प्रिय मित्र! किं वक्तुमनुमन्यते भवान्।

हेम—किमर्थं तदत्र प्रकटयितव्यम्।

चन्द्र—[स्वगतं] किमयमप्याचरेदनुचितम्।

मदन—सखि! सरोजिनी! सत्यं भण! कयेदमाचरितम्।

सरो—[सोत्स्मयं हेमचन्द्रमीक्षते]।

मदन—[स्वगतं] किमियमुत्सुकान्तरा विहरति।

चन्द्र—[सरोषं] अलमनुचिताचरणमुक्त्वा।

सरो—किमर्थमकारणं कुप्यसि? यदि न वक्तव्यमार्यस्य चेष्टितं तन्मूका भवामि।

मदन—[सानुनयं] सखि! प्रिया किल त्वं चन्द्रलेखायाः। अलं हेलया। विविक्तेऽस्मिन्नुद्याने का वा सा प्रियवयस्यं सधैर्यमित्थमालिङ्गितुं प्रभवतीति विस्मयो मे। वद तथ्यम्।

सरो—का वाऽन्या जयलक्ष्मीमन्तरा [सर्वे सकुतुका हसन्ति]।

चन्द्र [स्वगतं] किमत्राप्यासादिता जयश्रीः?

मदन—वद विस्तरेण। येनावामपि श्रुत्वा प्रहृष्यावः।

सरो—दूरादागतावावां दृष्ट्वा कृपाणपाणिरभ्युद्गतो दुर्मतिरितस्तात्।

मदन—[साश्चर्यं] किमितस्तात् । दैवेन संरक्षिते आत्रामि-
हस्थे । ततस्ततः ।

सरो—दृष्टमात्रेण वयस्यं वमद्वह्निविलोचनस्तत्तदसहश्रवं प्राव-
दत्, यावत्सहते सहजक्षमोऽयं तस्य दुरुक्तान्यतिवेल-
मुद्गतानि । ततोऽनियन्त्रितवचन एव हस्तगतकरवालेनार्यं
निहन्तुमुद्ययौ ।

मदन—स्वभाव एवायं दुर्धियाम् । ततस्ततः ।

सरो—तदा किल वयस्येन तत्करवालो लाघवादपहृत्य पाति-
तस्त्वनान्तिकतटे । स तु भृशममर्षितः प्रहर्तुमारभत मुष्ट्या ।
केशाकेशी मुष्टीमुष्टि युद्ध्यन्तौ क्षणमलुठतां वसुधायां च ।
चिरमिदमसहमानेन वयस्येनाधस्ताद्भूमितले पातितस्य
तस्य बलवती मुष्टिरेका प्रहिता वक्षस्थलम् । एवमुन्मूलितो
दुर्मतिरामूलमित्यलं पूजनावसरे भल्लूकप्रवेशेन । सखि !
वितर फलं समीकपरिश्रमस्य ।

चन्द्र—[सहर्षवेगं हेमचन्द्रमालिङ्गितुमारभते । सख्यौ हसतः । सलज्जा तिष्ठति ।]

सरो—अयि मदनलतिके एषा वितरतु वा मा वा । आवां तु
वितरेव रसालमाहृत्य ।

मदन—तथा [उभे प्रस्थिते ।]

चन्द्र—कथं यातो मां विहाय ।

सरो—उपहारार्हः किल प्रियवयस्यः । [इति उभे पादपान्तरिते ।]

हेम—प्रिये ! अलं मौनेन ।

चन्द्र—[स्वगतं सासूयं] केयमन्तरायिता स्वयङ्कृतालिङ्गना च।

मनद—का वा सा बहुमता? वयस्यस्य।

सरो—प्रिय मित्र! किं वक्तुमनुमन्यते भवान्।

हेम—किमर्थं तदत्र प्रकटयितव्यम्।

चन्द्र—[स्वगतं] किमयमप्याचरेदनुचितम्।

मदन—सखि! सरोजिनी! सत्यं भण! कयेदमाचरितम्।

सरो—[सोत्स्मयं हेमचन्द्रमीक्षते]।

मदन—[स्वगतं] किमियमुत्सुकान्तरा विहरति।

चन्द्र—[सरोषं] अलमनुचिताचरणमुक्त्वा।

सरो—किमर्थमकारणं कुप्यसि? यदि न वक्तव्यमार्यस्य चेष्टितं तन्मूका भवामि।

मदन—[सानुनयं] सखि! प्रिया किल त्वं चन्द्रलेखायाः। अलं हेलया। विविक्तेऽस्मिन्नुद्याने का वा सा प्रियवयस्यं सधैर्यमित्थमालिङ्गितुं प्रभवतीति विस्मयो मे। वद तथ्यम्।

सरो—का वाऽन्या जयलक्ष्मीमन्तरा [सर्वे सकुतुका हसन्ति]।

चन्द्र [स्वगतं] किमत्राप्यासादिता जयश्रीः?

मदन—वद विस्तरेण। येनावामपि श्रुत्वा प्रहृष्यावः।

सरो—दूरादागतावावां दृष्ट्वा कृपाणपाणिरभ्युद्गतो दुर्मतिरितस्तात्।

मदन—[साश्चर्यं] किमितस्तात् । दैवेन संरक्षिते आत्रामिहस्थे । ततस्ततः ।

सरो—दृष्टमात्रेण वयस्यं वमद्वह्निविलोचनस्तत्तदसहश्रवं प्रावदत्, यावत्सहते सहजक्षमोऽयं तस्य दुरुक्तान्यतिवेलमुद्गतानि । ततोऽनियन्त्रितवचन एव हस्तगतकरवालेनार्यं निहन्तुमुद्ययौ ।

मदन—स्वभाव एवायं दुर्धियाम् । ततस्ततः ।

सरो—तदा किल वयस्येन तत्करवालो लाघवादपहृत्य पातितस्त्वनन्तिकतटे । स तु भृशममर्षितः प्रहर्तुमारभत मुष्ट्या । केशाकेशी मुष्टीमुष्टि युद्धयन्तौ क्षणमलुठतां वसुधायां च । चिरमिदमसहमानेन वयस्येनाधस्ताद्भूमितले पातितस्य तस्य बलवती मुष्टिरेका प्रहिता वक्षस्थलम् । एवमुन्मूलितो दुर्मतिरामूलमित्यलं पूजनावसरे भल्लूकप्रवेशेन । सखि ! वितर फलं समीकपरिश्रमस्य ।

चन्द्र—[सहर्षवेगं हेमचन्द्रमालिङ्गितुमारभते । सख्यौ हसतः । सलज्जा तिष्ठति ।]

सरो—अयि मदनलतिके एषा वितरतु वा मा वा । आवां तु वितरेव रसालमाहृत्य ।

मदन—तथा [उभे प्रस्थिते ।]

चन्द्र—कथं यातो मां विहाय।

सरो—उपहारार्हः किल प्रियवयस्यः । [इति उभे पादपान्तरिते ।]

हेम—प्रिये ! अलं मौनेन ।

उत्कूजितान्तरमुपैति मनोहरत्वं
पुष्पन्धयेन सरसीरुहमिन्दुकान्ते ।
सेयं प्रवाहरुचिरा किमधित्यकासु
स्रोतस्विनी कलकलेन विना मनोज्ञा ॥८०॥

चन्द्र—[सलज्जास्मितं] आर्य! दूये पुनर्निदानीभूततया भवतः कृच्छ्राणाम् ।

हेम—भवतु, किमनेन। राहुग्रासेनैव राकानाथस्य रमणीयता।

चन्द्र—सत्यं । स हि स्वर्भानुरेव भवतः कीर्तिसुधांशोः । स हत इति महानद्य प्रमोदः ।

हेम—ज्ञातमिदानीमेव चरणरुजा खिन्ना त्वमिति शुद्धान्त प्रस्तावेन । तदनुचितमत्र तिष्ठन्त्या संलपितुम् । निकुञ्ज-मिदमाश्रयावहे । इति तां करेणादाय निकुञ्जं प्रविशति ।]

[ ततः उपतिष्ठेते सरोजिनीमदनलतिके । ]

मदन—सखि! अन्तरिमौ प्रविष्टौ । अवहिते भवेव ।

सरो—एवं ।

मदन—शङ्कते हृदयं सेनापतेर्दुर्मतेर्वधेन ।

सरो—किं वदसि भवितुं बद्धहस्तं प्रहर्तरि वैरिणि ।

मदन—नैवम् । अवरोधवधूजनमात्रोपभोग्ये चन्द्रलेखया संप्रत्यन्वास्यमाने दवीयसि विविक्ते निष्कुटे स हत इति महानालोचनाविषयः पौराणाम् ।

सरो—[सचिन्तं] आम्। किमर्थम्? कथमत्र समागतः? बलिना केन हतः इत्यत्र किं प्रतिविधेयम्?

मदन—यथा नाकृष्यते चन्द्रलेखाया नाम तथा किल संविधातव्यम्।

सरो—न विज्ञातमित्येव शपनीयमस्माभिः।

मदन—बहुमतो भूपतेरयम्। तदस्य हन्तुः शिक्षणाय नूनं प्रयतेत। तदस्माभिर्नितान्तं रक्षणीयमिदं वृत्तम्।

सरो—अनेन यदि यत्किंचित्संभविष्यति हेमचन्द्रस्य, तत्कृच्छ्राय भवेत्प्रियसख्याः।

[नेपथ्ये।]

क्लिष्टा रुजा चरणयोरिति चन्द्रलेखा
देव्या नितान्तगतयातनया विसृष्टः।
आदाय भेषजममोघमनन्तदासः
प्रेम्णाऽभिगच्छति सरस्तटनिष्कुटं तम् ॥८१॥

उभे [श्रुत्वा सभयं] का गतिः।

सरो—प्रस्थापय प्रियवयस्यं त्वरितम्। यावदनन्तदासमभिमुखीभूय सल्लापयिष्यामि। [इति निष्क्रान्ता।]

मदन—निकुञ्जमुखे तिष्ठन्ती। [क्लिष्टा रुजेत्यादि पठति।]

चन्द्र—[प्रविश्य सविषादं] किमागच्छत्यनन्तदासः।

मदन—अथ किम्।

हेम–[ससंभ्रमं प्रविशति।]

चन्द्र–[सगद्गदं] त्वरितमपक्रामत्वार्यपुत्रो दक्षिणमार्गेण।

हेम–[सविषादम्।]

पार्श्वप्रकीर्णचिकुरं पुलकाभिराम-
मामीलितेक्षणयुगं घनघर्मसिक्तम्।
विस्रंसिनीविवसनासहरम्यमध्यं
पश्यामि केलिकमनीयवपुः पुनः किम् ॥८२॥

चन्द्र–आर्यपुत्र। [इत्यर्धोक्ते।]

मदन–प्रियसखि मुञ्च प्रियसखं पुनर्दर्शनाय। आयातीवानन्तदासः।

चन्द्र–आर्य क्षम्यताम्।

हेम–तथा। [इति चन्द्रलेखां पश्यन्नेव निष्क्रान्तः।]

मदन–कैतवेन त्वया प्रोक्तः सखि यश्चरणामयः।
स वियोजयिता जातः प्रियप्रणयिनः पुनः ॥८३॥

आवामपि तमगदङ्करमेव पश्यावः।

चन्द्र–कथं गत एव सः? [करं पश्यन्ती] दिष्ट्या परिवर्तितमावयोरङ्गुलीयकम्। तदपि सुखाय मे यत्पश्यन्ती तस्येदं किञ्चिदिव निर्वृता भवेयम्॥ [इति निष्क्रान्ते।]

॥ चतुर्थोऽङ्कः ॥

## ॥ पञ्चमोऽङ्कः ॥

[ ततः प्रविशति आसनस्थो राजा सचिवः सर्वदमनश्च । ]

राजाः—किमिदमत्याहितं कृतं प्रतापरुद्रस्यैव मगधराज्येऽवरोधजनोद्याने सेनाधिप एव निहत इति न किमस्माकं परिभवाय ? कं भवान्मन्यते तस्य हन्तारम् ।

सर्वः—महाराज ! नालमन्यैः प्रवेष्टुमिदं नगरमस्मच्चाराविदितम् । तदन्यदेशीयैर्नायं हत इति निश्चप्रचं ज्ञायते । सम्यगनुदर्शनेन तत्स्थलस्य नूनमेकेनैव स हत इति निरूह्यते । को वा स एको दुर्मतेरपि बलीयानिति तावन्न शक्यते निश्चेतुम् ।

राजाः—भवतु किं वा भवेदस्य हनने कारणम् ?

सर्वः—शतवारमप्यापृष्टा अवरोधवधूजनवयस्या प्रतीहारिण्यश्च "यद्यवगतं ताभिरेव स्यादि"ति मत्वा ।

राजाः—अस्मद्देश्येन तदतिशायिवीर्येण-केनाप्येकेन अस्फुटकारणं स निहत इति किल पिण्डितोऽर्थः ।

सर्वः—अथ किम् ।

राजाः—यद्यस्फुटं कारणं मरणान्तमुद्योजयति कर्तुं, तन्नु मन्ये-द्वनिताविषयकम् ।

सर्वः—प्रायशो दृष्टमेवम् ।

राजाः–एवं चेत्का सा विवादविषयो ललना ?

सर्वः–कथमन्तःपुरेऽपि युज्यते दुर्मतेर्मानसव्यापारः ?

राजाः–मैवम् । चन्द्रलेखां परिणेतुं स कृतयत्न इति कदाऽपि मम कर्णपथं गता वार्ता । चरणरुजा क्लिष्टा तदैव सा गता दूरस्थं तदुद्यानं एकान्तनिषेवणायेति च ज्ञायते । निधार्येदं मनसि सम्भाव्यतां वृत्तम् ।

सर्वः–विषयीभूतमद्य मे प्रज्ञाचक्षुषः । इदमेवम् । एकान्तगतां चन्द्रलेखां द्रष्टुं तदुद्यानं गतो दुर्मतिः । हेमचन्द्रेण साऽनुरज्यत इति किल शङ्कितमस्माभिः । सोऽप्येवमेव तत्र समापतन्नन्तरा दुर्मतिना दृष्टः । परस्परकलहे च तं निहन्ति स । नान्यः प्रभवति दुर्मतेर्वधाय ।

राजाः–युक्तमुक्तं सचिवसत्तमेन । [सक्रोधं] आः पापाधम ! दुराचार ! किं बलगर्वितः किमपि कर्तुं न शङ्कसे ! किं ममापि सेनापतिं निघ्नन् जीवितुमिच्छसि ? अद्य एव त्वां द्विधा करोमि करवालेन । [सस्मरणं] कथं त्वमपि तस्य महात्मनः कलाधरस्य जातः ? वैदेहयुद्धे प्राणरक्षक इति कृतस्त्वय्यादरः । महान्विज्ञ इति च कृतो बहुमानः । कथमेवम्भूतस्त्वम् ? [सविषादं] निष्कुटएव मे सेनापतिं निहतं श्रुत्वा किं न हसिष्यन्ति महीक्षितः ? अरे ! दुर्विदग्ध ! किमिदमप्रधृष्यं मागधमपि शिथिलयितुमिच्छसि ? किमु कर्णे जप्तः प्रतिमहीपतिभिः ? [सवैक्लव्यं] वयस्य ! दुर्मते !

कथमित्थमवसानाय सृष्टोऽसि ? [सामर्षं] मन्यस्व राजदारिका-समाकाङ्क्षणफलमिदमिति । [साक्रोशं] सर्वदमन ! किं वाऽत्र प्रतिविधातव्यम् ।

सर्वः—महाराज ! मन्त्रयितव्यमेवेदं, यदद्य निरध्यक्षा वरूथिनी । मानी च पराजितो वैदेहः । न स भवेदकृतयत्नः पराभव निर्हाराय । विचिन्त्यैतदुचितं संविधातव्यम् ।

राजाः—[सोल्लुण्ठनं] अपि वयमेनं वधकं सेनानीं कुर्मः ।

भीत्या कामेन दाक्षिण्यात्कृतमन्तुं महीपतिः ।
न क्षणाच्छिक्षयति चेद्भविता तदराजकम् ॥८४॥
स्यादपि बलमत्तः सैनापत्यकामनया दुर्मतिं हतवान् ।

सर्वः—अन्यथा गृहीतं महाराजेन ।

यौधाधिपत्ये न रतिं विधत्ते न राजभोगेषु समुन्नतेषु ।
काव्याङ्गनायाश्चतुरिम्णि बद्धभावस्सदाऽयं रमते तयैव ॥

राजाः—तदैवायं हन्तव्यः, यदा सग्धौ चन्द्रलेखां सादरं पश्यन्नवर्णयत् । कलाधरे कविकुलेषु च दाक्षिण्येन तदा मुक्तः । तत एव हि तेनेदमत्याहितमाचरितम् । औदासीन्यानर्ह एवायं वैश्वानर इव स नूनं शिक्षणीयः ।

सर्वः—तस्य मन्तुं तु निर्णीय दण्डयेम महीपते ।
अनुमेयापराधानां शिक्षणं न हि युज्यते ॥८६॥

राजाः—नेदमुचितं नाम ।

एवंविधानि कार्याणि समक्षं न हि कुर्वते ।
अनुमानेन विज्ञाय दण्ड्यास्तत्कार्यकारिणः ॥८७॥

[क्षणं विचिन्त्य] कोऽत्र तिष्ठति ।

प्रतीहारी:—[प्रविश्य] आज्ञापयतु देवः ।

राजा:—आहूयतां मद्वचनाद्धेमचन्द्रः ।

प्रती:—यथाऽऽज्ञापयति देवः । [निष्क्रान्ता ।]

सर्वः—कथमयमकारणं तं निहन्तीति शङ्कते मनः ।

राजा:—ननु कारणादेव । [सदृष्टिक्षेपं] कथं स धूर्त इव ।

[ततः प्रविशति हेमचन्द्रः ।]

हेमचन्द्रः—[स्वगतं ।]

तामिन्दुबिम्बवदनां ललिताभिरामां
लज्जानतस्मितमुखीं रतिखेदखिन्नाम् ।
सञ्चिन्तयन्नखिलवस्तुषु निःस्पृहोऽयं
तद्दर्शनोत्सुक उदञ्चति मेऽन्तरात्मा ॥८८॥

अत्र महाराजः—[प्रकाशं] महाराज! स्वस्ति भवते ।

राजा:—[सरोषं] कथमस्य दुर्भगस्यापि स्वस्ति भवादृशपरिवारितस्य ।

हेमः—[स्वगतं] कथं रुष्ट इव? [प्रकाशं] यदि परिहीयते कुशलमस्माभिः तर्हि क्षणान्निर्गच्छामः ।

राजाः—कर्तव्यमखिलं कृत्वा किं वा निर्गमनेन।

हेमः—किं दुष्कृतमस्माभिः?

राजाः—अलं गोपनेन। स किल त्वया निहतो दुर्मतिः।

हेमः—अथ किम्। सत्यं मयैव निहतो दुर्मतिः।

राजाः—अरे धूर्त! कथं तमपि हत्वा निर्भीकोऽसि?

हेमः—तस्य दुष्टस्य शिक्षणेनोपकृत इव महाराजः।

राजाः—अरे प्रतारकपरिवृढ! हत्यां कृत्वाऽप्यात्मानं समर्थयसि? एवंविधमपमानं संपाद्य मे किं जीवितुमिच्छसि? अद्यैव त्वामनेन करवालेन निहन्याम्। [इत्युत्थातुमुद्युङ्क्ते।]

सर्वः—[अपवार्य] नहीदं न्याय्यं नाम शिक्षणमनिश्चितागसः।

राजाः—तर्हि?

सर्वः—विचार्य यथान्याय्यं कल्पयामः।

राजाः—विचारयतु भवान्।

सर्वः—हेमचन्द्र! किमर्थं निहतो दुर्मतिः।

हेमः—शृणोत्वार्यः। स किल दुर्मतिर्मम रत्नकृपाणलाभाद्भृशममर्षितोऽविरतकृतोद्यमो निहन्तुं माम्। सौशील्येनैव मे तममर्षमपोहयितुकामः प्रीतिबन्धमेव निक्षिप्य तस्मिन्नुदासीन एवाभवम्। आज्यसेकेनेव वैश्वानरः स किल सन्दीपितासूयो मनोविनोदायैकान्तनिष्कुटगतं समीकायुद्यतम-

प्रहरणं मां सक्रुपाण उपेत्य तत्तदसह्यं वदन्प्रहरति स्म। महाराजस्य सेनापतिरित्यनुचिन्तयन्नहमनवसानायैव तस्य प्रायते। मम तु स निधनाय प्रवृत्तः। अगतिकेन मया प्राणरक्षणाय प्रस्थापितो वैवस्वतसदनम्। महाराजरक्षणार्हे मयि निष्कारणममर्षितस्य रिक्तहस्तेन अधर्मयुद्धमाचरतस्तस्य पापिनो वधेन किं नाम नोपकृतो महाराजः?

राजाः—उपकृतो वा महाराजः सेनापतिवधेन? अलमलं प्रलोभनवचनैः। कः कोऽत्र तिष्ठति?

प्रतीः—आज्ञापयतु भर्ता।

राजाः–आहूयतामनङ्गदासः।

अनङ्गदासः—[प्रविश्य] प्रभो! अयमस्मि!

राजाः—अत्रैव सर्वाण्यवमोच्य भूषणानि निष्कास्यतामयमस्मद्देशात्।

हेमः—प्रियं नः। उचित एवायं दण्डः शीलमविज्ञाय कृतोपासनस्य मे।

सर्व—[स्वगतं] महानयं विपर्ययः प्रलयमूलं भवेत्। यत एष हि निष्कासितः प्रतिमहीपैरनुनीतोऽवस्कन्दयति पत्तनमिदम्। कथमद्य मोचनीयो महाराजोऽस्मात्सङ्कटात्?

अनङ्गः–[अवमोचयन्नाभरणानि] किमिदम्!! [खिन्नगात्रो वेपते]

राजाः—किम्! किम्!

अनङ्गः–[सकम्पं] इदमङ्गुलीयकं राजदारिकायाः।

हेम:—[स्वगतं] उपगतं नु परिवर्तनेनेदं ममाङ्गुलिम्। तद्गतेन मनसा किल चिरेणापि न दृष्टमिदम्?

सर्व:—[स्वगतं] मार्जारकरात्कीरः काकोदरमुखमनुप्राप्तः।

राजा:—[ससंभ्रमं] किं चन्द्रलेखाकराङ्गुलीयकं? [आदाय पश्यन्] अरे धूर्त! कितव पण्डितंमन्य! जार! अथवा चोरस्त्वम्। कथमिदमुपात्तं त्वयाऽन्तःपुरचर्या मे कन्यकाया नाममुद्राङ्कितम्। दुर्विदग्धमेनं पण्डितमामन्त्रयमाणेन वञ्चितोऽस्मि दैवेन। अरे पापाधम हतसेनापतेरद्य ममान्यः पराभव आपादितस्त्वया। [क्षणं विचिन्त्य, करिष्याम्येवम्]। अनङ्गदास! वन्दिगृहं नीत्वा रक्षितव्योऽयं जागरूकैः। रक्षितव्यश्चायमंगुलीयकोदन्तः। सर्वदमन! गच्छामि तावदवरोधम्। आज्ञापय दण्डवर्गं कारागृहगुप्त्यै।

सर्व:—तथा।

राजा:—[निष्क्रान्तः।]

सर्व:—[स्वगतं] अङ्गुलीयकच्छलेन रक्षितो महाराजो नियत्या। निर्वर्तयामि तावन्नरपतेर्निदेशम्। [इति निष्क्रान्तः।]

हेम:—आचरन्नपि कार्याणि न्याय्यानि भुवि मानवः।
आसादयति चेद्दण्डं तद्दैवस्यैव चेष्टितम् ॥८९॥

[इत्यनङ्गदासेन गृहीतहस्तो निष्क्रान्तः।]

॥ पञ्चमोऽङ्कः ॥

---

अरे हृदय! किमर्थं मुधा परितप्यसे? किमिद-मन्याय्यं यच्छिक्षणं दुर्मतिहन्तुः। यदि दाक्षिण्येन विमोचये-यमेनं, कथं वा मां बहुमन्येरन्प्रजाः। अथवा

एकेन हस्तेन विधाय दण्डं
प्रजासु मित्राहितनिर्विशेषम्।
आवर्ज्य इत्यन्यतरेण हार्दात्
किं वा विधाता विदधे नृपाणम् ॥९४॥

दुष्करमिदं पारावारावरोधनमिव पृथ्वीपतीनां प्रजा-संरक्षणमिति।

अप्रगल्भमनुकम्पया युतं चण्डमेव भृशदण्डकारिणम्।
त्यक्तसौहृदमपेतसंश्रयं वक्ति बालिशजनो महीक्षितम् ॥९५॥

अलं परितापेन। मया किल तस्य पौरुषं पाण्डित्यं चालक्ष्य रत्नकृपाणो दत्तः। तया तु रूपसंपदनुरूपोऽनुरागो-ऽङ्गुलीयकमुखेन प्रतिपादितः। हन्त! किं कुर्याम्?

प्रतीहारीः—[प्रविश्य] देव! कलाधर उपागतः।

राजाः—[स्वगतं] किमर्थमागच्छति [प्रकाशं] प्रवेशय।

[ कलाधरेण सह प्रविश्य। ]

प्रतीः—अत्र भर्ता। गच्छत्वार्यः।

कलाः—स्वस्ति महाराजाय।

राजाः—उपविशत्वार्यः ।

कलाः—[उपविश्य] कच्चित्सापराधं मन्यते महाराजो हेमचन्द्रम् ?

राजाः—कोऽत्र संशयः ? किं धर्म्यो दुर्मतिवधः ?

कलाः—किं न रक्षणीयाः प्राणाः शरीरिभिः ?

राजाः—अथ किम् ।

कलाः—तर्हि कथमपराधी भवति निजप्राणरक्षणार्थं कृत-शत्रुवधः ?

राजाः—तत्किल महाराजाय निवेद्य तेनैव निर्वर्त्यं कर्म ।

कलाः-अपीदं शक्यं यत्करवालेन क्रूरं प्रह्रियमाणस्य मध्ये विद्रुत्य राजनिकटे निवेदनं नाम ?

राजाः—नहीदं शक्यम् ।

कलाः—अत एवैवमाचरितं हेमचन्द्रेण । अगतिकेन निहतो दुर्मतिरिति ।

राजाः—दुर्मतिरेव हेमचन्द्रमादावभियुनक्ति स्मेत्यत्र किं वा प्रमाणम् ? निहतः पुनर्दुर्मतिः ।

कलाः-महाराज ! नखल्वविदितमिदं भवतो, यदहमेकपुत्रः पुत्रजीवितश्चेति । सहजक्षमेण भवता सफलीकरणीयैव ममे-यमभ्यर्थना । तुष्येयं तावदतिवेलं चिरसंमानादपि सह-भोजनादिभिरद्य मे तनयस्य विमोचनेन ।

कञ्चुः-[प्रविश्य] देव्यो विज्ञापयन्ति 'हेमचन्द्रस्य काराप्रक्षेप-श्रवणमात्रेण सुता चन्द्रलेखा प्रवाताहतेव कदली निपत्य

मूर्च्छामापन्ना । नऽद्यापि सत्वमापादिता । भिषगुत्तमाश्वा-
कारिताः । शुश्रूषामहे च वयं भवतो निदेशम्" इति ।

राजाः—[स्वगतं] किं वाऽत्र संविदध्याम्? [ वैक्लव्यं नाटयति ।

[ प्रविश्य सर्वदमनः । ]

सर्वः—अनुष्ठितो महाराजनिदेशः ।

राजाः—भवतु । एष किल कलाधरः प्रार्थयते पुत्रक्षमापणं
निजप्राणरक्षणाय कृतो वधो युक्तक्षम इति प्रतिपादयन् ।

सर्वः—सत्यमिदम् । अवगतं मया वृषसेनमुखादिदानीमेव
यद्दुर्मतिश्चिरायाऽपि तस्याऽऽसीज्जिघांसुरिति ।

राजाः—अप्येवम् ।

दूतः—[प्रविश्य] वर्धतां महाराजः । इदमन्तपालस्य विज्ञापन-
पत्रम् ।

राजाः—सर्वदमन! गृहीत्वा वाच्यताम् ।

सर्वः—[गृहीत्वा वाचयति ।] "सकलभुवनपतिमण्डलाक्रिरीटमणि-
सन्दीपितनखांकुरयोः महाराजचरणपङ्केरुहयोः शतकृत्वः
प्रणिपत्यान्तपालोऽब्जनाथो विज्ञापयति । पूर्वं पराजितो-
ऽसौ वैदेहः वररुचिः काश्मीरनाथेन, परिसृतमहीपति-
भिश्च कृतसन्धिः परानन्दादिभिरुद्योजितसर्वसेनासन्नाहः
सांपरायिकः प्रस्थित इति चारमुखादवगतम् । विदित्वा
देवः प्रमाणम्" इति ।

राजाः–[सरोषं] किमेते सह मिलित्वा समायान्ति? लुनामि तावत्पुच्छाञ्चलम्। अरे दूत दृढवक्र! गत्वा तमन्तपालमादिश मद्वचसा तत्रत्यैस्सहावरुध्य स्थातुम्। अनुपदमनुप्रेषयामि पृथनागणम्।

दूतः–यथाऽऽज्ञापयति देवः। [इति निष्क्रान्तः।]

राजाः–सचिव। प्रस्थाप्यतां सेना। वहाम्यहमेव पृतनाधिपत्यम्।

सर्वेः—सर्वक्षमोऽपि भवान्न स्वयं प्रथमतो गन्तुमर्हति। न न्याय्यमाचारः। तदेकः परीक्षितवीर्यो नियोजयितव्यो वाहिनीपत्ये।

राजाः–कोऽत्र वर्तते तदर्हः समवेतानां महीपतीनां विजयाय?

सर्वेः–किं न हेमचन्द्रः? स किल प्रकटितपराक्रमो विदेहयुद्धे सांप्रतं च निहत्य दुर्धर्षं दुर्मतिम्।

कलाः–आदिशतु महाराजः। वयं किल धृतप्राणा मागधायः।

राजाः–आहूयतामनङ्गदासः। शृणुमो यदयं वदति।

[ निष्क्रम्य प्रतीहारी तेन सह प्रविशति।]

अनङ्गः–विजयी भवतु महाराजः।

राजाः—पृच्छामि त्वामानन्तरिकं दुर्मतेः। अद्य किल श्रूयते प्रतिमहीपतयः पञ्चषाः समीकसन्नद्धाः समायान्तीति। अपि शक्तोऽसि सेनानिर्वाहाय?

अनङ्गः–सन्नद्ध एवास्मि महाराजप्रतापातपावभासितो यथा-
शक्ति निर्वोढुम्। तथाऽपि..................।

राजाः–किं तथाऽपिना? पञ्चषाः समायान्तीति किल
विचारयसि? सचिवः किल सर्वदमनः समुद्योजयत्यनु-
प्रेषितुं हेमचन्द्रम्।

अनङ्गः–यद्येवमनुगृहीतोऽयं पृतनागणः। समभिषिच्य
सैनापत्ये प्रस्थाप्यतां हेमचन्द्रः, येन वयं नूनं विजयिनो
निवर्त्स्यामः।

कलाः–[स्वागतं] अनुकूलो विधिरस्माकम्।

राजाः—भवतु। सहृदयतया किलोपकर्तव्यः समीकः।
कथमयं धिक्कृतिदूयमानः करिष्यति सप्रेमभावं साम्परायम्।

सर्वः—नाऽयं तथाविधः–

मनुते पुराकृतं तं बहुमानं शीलवान् वीरः।
न हि किल दुरुक्तवानयमालोकयति स्म नापि विद्वेषात्॥

कलाः–महाराज! यद्वयं कृतभोजना देयप्राणा एव भवताम्।

राजाः–सचिवोत्तम! स्वयमेव गत्वा समानीयतां हेमचन्द्रः।
ज्ञास्यामस्तावत्तस्याभिसन्धिम्।

सर्वः–तथा। [इति निष्क्रान्तः।]

अनङ्गः–सस्यगालोचितमदूरविजयेन महाराजेन।

[ ततः प्रविशति हेमचन्द्रेण सह सचिवः । ]

हेमचन्द्रः—वर्धतां महाराजः। इदमत्र विज्ञापना महाराजस्य। ज्ञायते तावन्मया कृतसेनापतिवधेन संपादितमिदमनिष्टं महाराजस्येति। यद्वयं कृतसम्मानास्तदा तदा महाराजेन निर्हरणीयमिदमस्माभिः। विशेषतश्च ममानिष्टानिदानभूततया जीवितदानेनापि। अत आज्ञापयतु महाराजो भटनिर्विशेषमभियातुं समीकम्।

राजाः—हृष्टोऽस्मि ते सौशील्येन। वचनमिदमुचितं तवैव। अपि संमन्यसे पृतनाधिपत्यमुपादाय समीकपरिश्रममनुभवितुम्।

हेम—यदि विस्रब्धो मयि महाराजस्तन्मे सुकृतपरिणामः।

राजा—अनङ्गदास! त्वमेव हेमचन्द्रमाभूषय सर्वैराभरणैः।

अनङ्गः—अनुगृहीतोऽहम्। [ इत्याभूषयति । ]

राजाः—हेमचन्द्र!

मांऽस्तु प्रमादो रिपुयोधवर्गे
स्तोकेऽपि यत्कूटसमीकिनस्ते।
रक्षन्पुरस्ताद्बलमात्मनीनं
सापत्नमास्कन्द्य चक्रजालम्॥९७॥

सचिवः सर्वदमनोऽपि ते पार्श्वरक्षको भवतु॥

हेमः—यदादिशति महाराजः।

राजाः—सचिवमणे! सर्वदमन! विजयश्रीपरिष्कृतेनानेन त्वामचिराद्दिदृक्षे।

हेमः—महाराज! तात! आमन्त्रये वो विजयनिवर्तनाय।

कलाः—विजयी प्रतिनिवृत्य राज्ञः प्रकटितकृतज्ञो भव।

हेमः—जयश्रीरस्तु मगधानाम्!!

सर्वेः—जयश्रीरस्तु मगधानाम्!!

राजाः—प्रतिष्ठन्तां पुनर्जयाय मे सैनिका हेमचन्द्रस्याध्यक्षे।

[इति हेमचन्द्रहस्ते खड्गं मुक्तकक्षं कृत्वाऽर्पयति।]

हेमः—तथा। [इति सर्वदमनहेमचन्द्रावनङ्गदासेन सह निष्क्रान्तौ।]

राजाः—हेमचन्द्रमनुप्रेष्य यन्मनो मुदमेति मे।
करस्थामिव पश्यामि परां विजयसंपदम् ॥९८॥

आर्य! कलाधर विश्राम्यतु भवान्। इतिवृत्तमावेद्य तोषयामि तावदस्वस्थां चन्द्रलेखाम्।

[इति कलाधरेण निष्क्रान्तः।]

॥ षष्ठोऽङ्कः॥

---

## ॥ सप्तमोऽङ्कः ॥

[ ततः प्रविशति चारः संवर्तकः । ]

चारः—आज्ञप्तोऽस्मि काश्मीराधिपेन महाराजकमलनाथेन "चार संवर्तक! एष किल हेमचन्द्रो रात्रिन्दिवमपि दिनत्रयं सङ्घीभूयाभियुद्ध्यमानोऽपि दुराधर्ष एव वर्तते। अजेयोऽयमनीकेन पुनर्वञ्चनयैव निर्हार्यः। अवगतमद्यैव, यन्मागधेनापमानितोऽपि बन्दिगृह-बन्धादिना तत्सुतायां चन्द्रलेखायां बद्धानुरागस्तां परिणेतुकाम इत्थमतिव्यवसितो युद्ध्यतीति। नूनं स त्यक्तप्रहरणो विद्राविष्यति यदि चन्द्रलेखा हनिष्यते। अतो यथाकथंचित्त्वरितं चन्द्रलेखा प्राणैर्वियोजनीयेति"। परिज्ञातमिदमत्र समागतेन, यद्धेमचन्द्रस्य चिरयुद्धमनुचिन्त्य संप्राप्तचिन्तासाध्वसा चन्द्रलेखा निजकुलदेवतां कात्यायनीं पूजयितुं गताऽनेनैव निष्कुटपथेन प्रतिनिवर्तत इति। तदास्थाय मार्गमभिलषितं संपादयामि।

[ ततः प्रविशति चन्द्रलेखा सखीभ्याम् । ]

चन्द्रः—ज्ञात्वापि विक्रमनिधिं कविपुङ्गवं तं
दुर्जेयमप्यखिलभूपतिभिः सुयुक्तैः।
यद्दीर्घमापतति घोरतरं समीकं
रात्रिन्दिवं तदिह मां तरलीकरोति ॥९९॥

मदनः-निर्वृता भव। कल्याणमस्माकं कात्यायनी विधास्यति।

सरो:-नूनमचिराद्विजयिनमभिनिवर्तमानं द्रक्ष्यसि प्रियवयस्यम्।

चन्द्र:-[सतोषं] तथैव मन्ये यत्स्फुरति मे वामं नयनम् ।

संवः—[स्वगतं] अयमेव काल आत्मन उपस्थापनाय । [पुरतो गत्वा] स्वागतं वः।

चन्द्र:—[ससंभ्रमं स्वगतं] कथमत्र ब्राह्मण इव ? [प्रकाशं] आर्य वन्दे । [इति प्रणमति] ।

मदनः-किमस्माकं सुशकवेदं "को भवान् विजने तिष्ठती"ति।

संवः—न किल रहस्यं नाम किञ्चिदवाच्यमस्ति विप्रस्य ?

मदनः-तर्हि कृतार्था वयम् ।

सरो:-[अपवार्य] मदनलतिके! कुतोऽयमसांप्रतमाचरति कृत-प्रणामायाः सख्या अनुक्ताशीर्वचनः ?

मदन:-[अपवार्य] लीनहृदयाः खलु परस्मिन् ब्रह्मणि महात्मानः।

सरो:-को भवानत्र विजने तिष्ठति ?

संवः-का यूयम् ?

मदनः-इयमस्मद्राजदारिका । आवां वयस्ये । आवेदयतु भवान् क इति ।

संवः-किमियं राजदारिका ?।

सरो:[स्वगतं] -कोऽयमनीहो निजवृत्तकथनस्य ? [प्रकाशं] ननु पृच्छामि को भवान् ? किमर्थमत्र समागत इति ?

संव:—[अनाकर्णितकेन मदनलतिकां प्रति] किमियमेव राजदारिका?। अनूढेव ?।

मदन:—आर्य! क्षन्तुमर्हसि? संवरणार्हाणि राजगृहरहस्यानि?

चन्द्र:—[स्वगतं] किमर्थमेव ब्राह्मणः पृच्छत्यसंगतानि।

सरो:—[सरोषं] कथमनुत्तरोऽस्मत्प्रश्नानां यत्किञ्चिदाकांक्षसे वेत्तुं राजगृहरहस्यम्? किमु भवान् सत्यमग्रज एव?

संव:—[सभयं स्वगतं] विवृतः किं मे वेषः? [प्रकाशं] कुतोऽस्थाने कोपो वयस्यायाः?

मदन:—भवतु! महाब्राह्मण! को भवान्? किमर्थमागतः?

संव:—वैदेहाभिजनोऽहम्। क्षेत्राटनसमुद्यतेन पथिकवर्गेण सङ्गत्याद्यैवात्र सन्निहितः।

चन्द्र:—[सौत्सुक्यं] आर्य! किञ्चिद्वेत्ति भवान् सीमतटे संभवन्तं युद्धम्?

संव:—प्रत्यक्षतश्च दृष्टं दिनत्रयं। अत एव च विलम्बितमागमनम्।

चन्द्र:—वयमुत्सुका आयोधनवृत्ताकर्णने। अनुगृह्णातु महीसुरो याथातथ्यकथनेन।

संव:—[स्वगतं] तदर्थमेवायमारम्भः। [प्रकाशं] शृणुथ यदि कौतुकम्। प्रथमतः किल मगधानिमान् प्रवेष्टुं कृतसन्नाहे वैदेहसैन्ये अन्तपालेनाञ्जनाथेन निरुद्धा गतिः। अल्पी-

यसीं वीक्ष्यैतत्पृतनां विभेत्तुमिव तं गारुडं व्यूहं शरान-
वर्षत्परानन्दः । करवालकरः काश्मीरनाथः प्रत्यरुणत्पार्श्व-
मेकम् । एकान्ततश्च वररुचिराविश्य बिभेद । इत्थमायो-
धने घोरे प्रवृत्तेऽचिरेणैव स किलान्तपालः क्षताङ्गः
शिश्ये शताङ्गे ।

सरो:—मुह्यतीव मनः । ततस्ततः ।

संव:—तत्क्षणादेव दिवमिव भिन्दन्निनादेन कम्पयंश्च वसु-
न्धरामाविरभूत्सैनिकपारावारो मागधानाम् । दृष्ट्वेमामसंख्या-
मनीकिनीं प्रास्तक्रुधो महीक्षितोऽगणितशरीराः हस्तगतैः
प्रहरणैर्हन्तुमारभन्त । एवमेवाविज्ञातशरीरौ सर्वैरप्यायुधैः
दिनद्वयं दिवारात्रमयुध्येतामुभावपि पक्षौ । तदा तु सर्व
दमन इत्येकः भृशं रुष्ट आदाय कृपाणं कमलनाथं हन्तु-
कामः प्रविष्टो रिपुचमूम् । तदा किल भृशममर्षिताः प्रति-
भूपतयस्त्यक्तुकामा इव जीवितमतिवेलं प्रहर्तुमारभन्त ।

मदनः—[सोद्वेगं] ततस्ततः ।

संव:—अवसितमायोधनं कर्तुं कृतयत्नावुभौ । तदा च स्वकीयं
नाम यथार्थं कुर्वन्तमन्वीक्ष्य सर्वदमनं परममर्षितः परा-
नन्दः स्वसैन्येन निरुन्धन् चिरोद्यमेन तं बन्दीचकार ।

सरो:—सचिवोत्तम ! कथं त्वमपि बन्दीकृतः ?

संव:—दृष्ट्वेदं दीनमाक्रन्दत्सु मगधयोधवर्गेषु गुहाविनिर्गत
इव कण्ठीरवो धृतिरिव धृतशरीरो हेमचन्द्र इति कश्चन

दर्शनीयं रत्नकृपाणं करे कुर्वन् गंभीरं प्रविष्टो वैदेहवरूथिनीम् । तदा किल दृश्यमभूदायोघनम् ।

वैदेहो नष्टदर्पो भुवमगमदहो लोहितेनोक्षिताङ्गः
सोऽयं काश्मीरनाथस्त्वसुकलितमतिः कातरः प्राद्रवच्च ।
भूपास्त्वन्ये प्रवृत्ताश्चकितनिजचमूप्रत्यवस्थापनार्थं
हाहाकारैः कठोरैस्त्रुटितकरपदैश्चुक्रुशेऽनीकिवर्गैः ॥

चन्द्रः—[सश्लाघं] आर्यस्य दुष्प्रसहं तेजः ।

संवः—[स्वगतं] इतः परमेव मिथ्योदन्तः प्रकटयितव्यः । [प्रकाशं] यदाऽयं मूर्तिमानिव कालरुद्रो निजकरवालेन परानीकं निघ्नन्नुन्मूलयामास । तदा किल रुष्टः परानन्दोऽविज्ञातः पृष्ठमागत्य सकरवालं हेमचन्द्रं दृढमानध्य पातयामास वसुधातले ।

चन्द्रः—[सवेगं] ततस्ततः ।

संवः—यावदयं प्रायतत तद्बन्धादुन्मोचयितुमात्मानं तावत्पार्श्वासन्नेन सेनापतिना सहस्रयोधिना हन्त ! निजकरवालेन च्छिन्नं तस्य काकपक्षरमणीयं शिरः ।

चन्द्रः—हा—[इति मूर्च्छति] ।

मदनः—[सविषादं] हेमचन्द्रस्याप्येवं दुर्गतिः ।

सरोः—हताऽद्य चन्द्रलेखा ।

मदनः—वयं च मगधराज्यमपि । अतर्कितमिदमवसितिमेष्यति मगधराज्यश्रीरित्थमिति ।

सरोः—[सातङ्कं] का कथा महाराजस्य तपस्विन्या राज्ञ्या वा ?

संवेः—कथं यूयं तस्य हेमचन्द्रस्य पक्षपातिन्यः ? । यदीदं मे विज्ञातपूर्वं नाप्रकटिष्यत मया युद्धोदन्तः । [विषादं नाटयति ।]

मदनः—[सशोकं चन्द्रलेखां वीजयति ।]

सरोः—अतः परं कथयतु भवान् ।

संवः—शोचे तावद्भवतीनां शोकमूलमात्मानमनुचिन्त्य ।

मदनः—किं करोतु भवान् ? यद्वयं दुर्विधिदग्धाः ।

संवः—बन्दिनं सर्वदमनं निहतं हेमचन्द्रं च वीक्ष्य भीतभीताः प्राद्रवन्मागधयोधा विदिशो दिशः । हेमचन्द्रवधश्रवणकौतुकसंलब्धसंतोषबलो वैदेहनाथो निजकरकलिततच्छिराः सकुतुकसंघुष्यत्सैनिकवर्गो विजयमहोत्सवमभ्यनन्दत ।

मदनः—कच्चिच्छ्रुतिमुपगतं तस्य करिष्यमाणं कर्म ।

संवः—अथ किम् ? अत्रान्तःप्रविश्य बन्दीकरिष्यति प्रतापरुद्रमिति ।

मदनः—[सभयं] कष्टम् ! कष्टम् !! का गतिः ?

चन्द्रः—[नेत्रे उन्मील्य] हा पण्डितमणे ! हा त्रिलोकैकवीर ! हा धैर्यनिधे ! कथं त्वमपि हतः ? कथमिदमपि भाव्यं नाम ? यद्बालपोतेन वैनतेयो हत इति । मन्दवातेन

समुन्मूलितो मलयाचल इति, मेषशिशुना निहतो मृगेन्द्र इति। न विस्रम्भमर्हतीयं कथा हेमचन्द्रोऽप्यायोधने विजित इति। वञ्चनयापि नायमलं विजेतुम्। हा दुर्विदग्धविधे दर्शितं त्वयाऽतर्कितोपनमने कौशलम्। किमिदमबलायामपि दर्शनीयमेव! किं वा न सङ्कल्पितं मूढया "अक्लिष्टतनुर्विजयी प्रत्यागमिष्यतीति तमुन्मुखीभूय नन्तव्यमिति। मगधाधिराज्ये अभिषेचयितव्य इति। अथ" ...., इत्थमामनन्त्या दुर्भगयैव भवतो निधनमापादितम्। आर्य! शुद्धात्मन्! को वाऽन्यो बन्दिगृहात्समीकं प्राप्य कुर्वीत यावत्प्राणमित्थमायोधनम्। आर्य! सकलललनाहृदयचोर! इह मम पूर्वपुण्येन मयि विन्यस्तप्रेमभावो भवानद्य किल नूनं स्वर्वनितास्वहमहमिकादत्तकरावलम्बासु कलहबीजं वप्स्यसि! हाः सखि! सरोजिनि! सन्दीपय वह्निम्। महात्मानं तमनुगमिष्यामि। नाहमीशे पराभवपरिदूनहृदयं पितरं द्रष्टुं, अथवा तपस्विनीं मातरम्।

सरो०—[अपवार्य] किमत्र कार्यं मदनलतिके!

मदनः—[अपवार्य] अचिन्त्यमिदं विजयी वैदेहः सैन्यैः समं नगरीं प्रविष्टः किं वा करिष्यतीति। स किल कामुको दुःशीलश्च। तदत्र सख्या साकं पावकं प्रविशावः।

चन्द्रः—[सदैन्यं] अयि! कथं युवामप्यद्य ममान्तिमप्रार्थनानिर्वर्तने मन्थरीभूते।

मदनः—[भ्रूसंज्ञया चोदयति सरोजिनीम् ।]

सरो०—[परिसरगतकाष्ठैरग्निमुद्दीपयति ।]

चन्द्र:—[दीप्तमग्निं प्रदक्षिणीकुर्वन्ती ।]

भगवन्! धनञ्जय!

यं भावयामि सततं मनसा कृशानो
प्रेमानुबन्ध इह मे निहितश्च यस्मिन् ।
भूयः कवीन्द्रतनयस्स तु हेमचन्द्रो
जन्मान्तरेऽपि पतिरस्तु न विप्रयोगः ॥१०१॥

सखि मदनलतिके! सरोजिनि! निष्फलमियमुपासिता भवतीभ्यां किंशुकीव। शोचामि नाहमात्मने न वा पित्रोः मानिन्यौ भवत्यौ मदेकाश्रये इतः परं कथं जीविष्यतः तस्मिन् प्रविष्टे दुष्टे। क्षन्तुमर्हथो ममापराधाननन्तान्राजदारिकादर्पेण कृतान् । अथवा प्राणा मम भवत्यौ । [ उभे रुदतः ] आर्य पूर्वज! किं नोचितं मम तदेकजीवितायाा आत्मार्पणं हुतभोजने ।

संव:—क्षत्रनारीणां खल्विदमनादिव्रतम् ।

चन्द्र:—देव! हव्यवाह! प्रतिगृह्णीष्व मां विप्रवरानुज्ञातां तव तनयामिव । [इति ध्यायति]

संव:—[सतोषं] सिद्धं समीहितम् ।

[ नेपथ्ये दुन्दुभिध्वनिः । ]

मदनः—[सभयं] आयातीव विदेहाधिपः । [कम्पते]

चन्द्रः—हुतभोजन! स्वीकुरु मामनपराधाम् । [इति पतति]

सरोः—विरम! [चन्द्रलेखामवष्टम्भते ।]

चन्द्रः—[सदैन्यं] किमर्थं निषेधसि मां दुर्भगाम् ।

सरोः—श्रुतोऽयं दुन्दुभिस्वनो मागध इव ।

मदनः—[सविमर्शं] आं तथैव ।

चन्द्रः—कथमद्य मागधदुन्दुभेः संभवः?

[पुनर्नेपथ्ये ।]

जित्वा समुद्यतभयानकशस्त्रिसङ्घान्
काश्मीरकुन्तलविदेहमुखान्महीपान् ।
आदाय रत्ननिचयं गजराजपृष्ठे-
ष्वायाति वीर्यनिधिरेष हि हेमचन्द्रः ॥१०२॥

संवः—[सभयं] विजयी हेमचन्द्रः किल समायाति । [इति पला-यितुमुद्युङ्क्ते । सरोजिनी तं गृह्णाति । ]

सरोः—तथ्यमिदम् । [सरोषं] एष खलु विप्रवटुर्मया पूर्वमेव संशयितः । अरे! विप्राधम! कस्त्वम्? तथ्यं वद । अन्यथा त्वामत्रैवाग्नौ पातयेयम् ।

संवः—[सभयं] चारोऽहं काश्मीरनाथस्य । नायमपराधो मम! तदाज्ञयाऽनुष्ठितः ।

चन्द्रः—[साश्चर्यं] कथं त्वं चारः?

शतबलिः—[प्रविश्य सविनयं] वर्धतां राजदारिका । विजयिनं विनिवर्तमानं कुमारहेमचन्द्रं संभावयितुं आयुष्मतीमभिगच्छति महाराजः ।

सरोः—हस्तग्राहं गृहीतोऽयं काश्मीरचारो मुण्डितशिराः क्षतकर्णो निर्वास्यतामित्यादिशतु प्रियसखी ।

संवः—देव्यो वो विज्ञापनम् । सापराधमपि शरणागतं रक्षन्तु भवत्यः । [इति पादयोः पतति । ]

चन्द्रः—अयि सरोजिनि! मुञ्चैनम् । अरे पलायस्व ।

संवः—रक्षितोऽस्मि [इति पलायते ।]

[ ततः प्रविशति सपत्नीपरिवारः राजा । ]

राजाः—प्रिये! अद्यापि रक्षिता मगधश्रीः हेमचन्द्रेणैव । कथमिमं संभावयेम?

देवीः—दत्त्वैव प्राणभूतां वत्सां चन्द्रलेखाम् ।

राजाः—उचितमिदम् । [चन्द्रलेखां परिष्वज्य] वत्से! वर्धसे विजयिभर्तृसमागमेन ।

चन्द्रः—[सलज्जा तिष्ठति ।]

[ ततः प्रविसति हेमचन्द्रः सर्वदमनश्च सपरिवारः । ]

सर्वदमनः—विजयेन वर्धते महाराजः ।

चन्द्रः—[स्वगतं] दिष्टया नायमतिश्रान्त आर्यपुत्रः ।

हेम:—महाराज! महनीयभवत्प्रतापानलाविष्टतेजसा मया श्रीमतां तत्रभवतां महतीयं मगधराज्यश्रीः संरक्षिता ।
[इति खड्गमर्पयति ।]

राजा:—[सादरमालिङ्गति । ततः प्रविशति कलाधरः ।]

कलाधरः—कृच्छ्राण्यवाप्य निखिलानि च दुःसहानि
स्वर्भानुमुक्त इव शीतकरः कुमारः ।
सन्दीपयत्यखिलदिग्वलयं यशोभि-
रित्यत्र मे श्रुतवतः किमु लभ्यमन्यत् ॥१०३॥

हेम:—तात अभिवादये ।

कला:—अभिमतेन युज्यस्व ।

राजा:—आर्य! कलाधर! क्षम्यतां मम तदातनो दुरतिक्रमः संभ्रमकृतः ।

कला:—किमर्थमिदं क्षमापणं नाम ।

यथोग्ररसितान्मेघो भावि वर्षं व्यनक्ति नः ।
तथाऽस्माकं भवान् क्लेशाद्भाविनीं भाग्यसम्पदम् ॥

राजा:—सदृशमेतद्वचनं भवादृशामेव मनीषिणाम् । तात हेमचन्द्र! ।

वल्ल्येन्द्रसुतया पूर्वं कुमार इव पार्श्वयोः ।
चिरं राजस्व मागध्या श्रिया च सुतया मम ॥१०५॥

वत्से! प्रणम! प्रथमतः श्वशुरं ते ।

चन्द्रः—[सलज्जा प्रणमति।]

कला:—सिद्धफलाऽस्तु ते मानसी वृत्तिः।

राजा—निर्जितं निखिलवैरिकुलं तव
प्रापिता प्रियपतिं मम कन्या।
शासितारमनघं च जना मे
किन्तु वस्त्वपरमस्ति विधेयम् ॥१०६॥

कला:—अथ किम्। तथापीदमस्तु भरतवाक्यम्।

पृथ्वीं शास्तु नृपो बुधैः परिवृतस्तद्धर्मवाक्यानुगः
भाषां किं च चिरन्तनीं सुमनसः संमानयन्त्वन्वहम्।
पर्जन्यैः क्रमवर्षुकैः वसुमती सत्सस्यभूषान्विता
सर्वान्वर्धयतान्नितान्तमुदितो धर्मेण भूयाज्जनः॥

[इति निष्क्रान्तास्सर्वे।]

॥ सप्तमोऽङ्कः ॥

॥ समाप्तः ॥



## ॥ शुद्धाशुद्धपत्रिका ॥

| | | | |
|---|---|---|---|
| | IV | शताननमित्रः | शताननमित्रम् |
| 4 | 4 | दर्शनीय | सुशकदर्शन |
| | 9 | धर्ष | धृष्यः |
| 8 | 19 | वाश्चति | वाञ्छति |
| 10 | 3 | पृष्ठत | पृष्ठत |
| 12 | 15 | चनछले | चनच्छले |
| 20 | 4 | साहसं | सहासं |
| 22 | 10 | त्वादा | त्वदा |
| 28 | 20 | षेधतींतां | षेधयन्तीं |
| 31 | 16 | छिमनास | छिमानस |
| 32 | 5 | जन्मजन्म | सर्वजन्म |
| 11 | 14 | पाठनो | पाटनो |
| | 16 | काश्चि | किञ्चि |
| 34 | 4 | अज्ञसा | आज्ञसा |
| 35 | 3 | हेमचन्द्र पुत्र | हेमचन्द्रस्य पुत्र |
| 36 | 8 | कैशलं | कौशलं |
| 38 | 21 | परिवर्तिने | परिवर्तने |
| 41 | 15 | त्तिष्टन्ती | त्तिष्ठन्ती |
| 43 | 10 | केश्री | केश्चि |
| 45 | 17 | सल्लाप | संल्लाप |
| 46 | 13 | युद्ध | युध |

| | | | |
|---|---|---|---|
| 49 | 7 | वधकं | वधकरं |
| 54 | 10 | ल्पिष्ट | ल्पिष्ट |
| | | भृशपापं | किल पापं |
| | 12 | क्षीण | नाश |
| 59 | 4 | पृथना | पृतना |
| 60 | 9 | स्वागतं | स्वगतं |
| 62 | 4 | कृतज्ञो | कृतज्ञभावो |
| | 7 | ध्यक्षे | ध्यक्ष्ये |
| 70 | 11 | मनिन्यौं | मानिन्यौं |
| 72 | 10 | प्रविति | प्रविशति |
| | 17 | प्रविसति | प्रविशति |



# Select Opinions.

---

## **Prabuddha Bharata** of May 1938.

**Thyagaraja Charita**—Besides the life-history of the hero, the book contains also an exposition of the excellence of Bhakti-yoga, the striking characteristics of a saintly life, and, above all a soulful praise of the hero's hero—Sri Rama himself. We recommend this excellent piece of Sanskrit poetical composition to all the lovers of our classical language and believe that its perusal will not fail to inspire them with the great ideal of devotion which the author has so successfully depicted in his maiden venture.

## **Journal of the Music Academy**

Madras (1935—37)

His talent for dramatic presentation of situations in the story and his power of characterisation are undeniable. The realism of the scenes, the appositeness of the speeches, the distinct individuality of the characters, the profusion of the descriptive eloquence, the spaciousness of the narrative scheme, all these remind us of the grand epics of India.

## **The Vaitarani** of July 1938.

By a casual perusal of this booklet, the product of author's great pains the devotional ray flashes and keeps on firing even through the dim dark atheistic mind.

With a language chaste and simple a theme vast and deep, a symmetry well carved out, the book is quite fit to be read and reread by the god-loving public.

## **Oriental Literary Digest** of July 1938.

**Ramamritatarangini**—We have here 21 pieces, a majority of which deal with the life-story of Rāma. All of them are written in simple and elegant Sanskrit and deserve to be studied in High Schools where Sanskrit is taught. Sanskritists will feel refreshed by their perusal as they are capable of cheering up their minds when dulled by a hard study of abstruse subjects like Mimāmsā, Nyāya etc. We hope Mr. Sarma will give us many more original writings in Sanskrit in the years to come.

## **Oriental Literary Digest** of April 1940.

**Raghavagunarathnakara**—We cannot but admire Mr. Sundaresa's hold over Sanskrit and his success in keeping alive even today the spirit of this language which has been the proud heritage of India since ages past.

—

# Our Publications

## BY THE SAME AUTHOR

### (T. S. Sundaresa Sarma)

| | Rs. A. P. |
|---|---|
| 1. **Sri Tyagaraja Charitam**—Containing 1800 verses–Full life story of Tiruvaiyar Saint Sri Tygaraja Swamigal .... .... | 1—0—0 |
| 2. **Ramamrita Tarangini**—Containing: Paduka Charitam, Rama Janma Karanam, Manthara Vritham, Sanaischara Garvabhangam and other Stotras .... .... | 0—8—0 |
| 3. **Sringara Sekhara Bhana** .... | 0—6—0 |
| 4 **Raghava Guna Ratnakaram** .... | 0—6—0 |
| 5. **Prema Vijayam** .... .... | 1—0—0 |

**All the books available for Rs 2-4-0.**

(Postage Extra)

*For Copies apply to :—*

**The General S**

**South Main St**